# सहस्रागमः

## SAHASRAGAMA

### अष्टबन्धन विधिः (Vol :1)

CRITICAL EDITOR: SIVA SRI. DR. S.SAMBANDA SIVACARYAR (AVL.)



V.A.R.C – 21

3RD CONVOCATION ~2014

VEDA AGAMA RESEARCH CENTER, SRI SRI GURUKUL, BANGALORE-82.

JAI GURU DEV

# सहस्रागमः

# SAHASRAGAMA

VOLUME: 1


## VEDA AGAMA RESEARCH CENTER

VEDA AGAMA SAMSKRUTHA MAHA PATASHALA,
SRI SRI GURUKUL CAMPUS,
ART OF LIVING INTERNATIONAL ASHRAM
21ST KM, KANAKAPURA ROAD, UDYAPURA,
BANGALORE -560082.

# BIBLIOGRAPHICAL DATA


| | | |
|---|---|---|
| TITLE OF BOOK | : | *SAHASRAGAMA ( VOL :1)* |
| SUBJECT | : | AGAMA SAMHITA TEXT<br>(SANSKRIT) |
| CRITICAL EDITOR | : | **SIVA SRI. DR. S.SAMBANDA SIVACHARYAR(AVL)** |
| PUBLISHED BY | : | **VEDA AGAMA RESEARCH CENTER**<br>(PUBLICATION DIVISION)<br>VEDA AGAMA SAMSKRUTHA MAHA PATASHALA,<br>SRI SRI GURUKUL CAMPUS,<br>VED VIGANAN MAHA VIDHYA PEETH,<br>UDAYAPURA, BANGALORE – 560082. |
| EDITION | : | 1ST EDITION |
| COPIES | : | 1,000 |
| RELEASED ON | : | 3RD CONVOCATION – 2014 |
| PRINTED AT | : | |
| NO. OF PAGES | : | |
| PAPER SIZE | : | |

॥श्रीः॥

# सहस्त्रागमः

## अष्टबन्धनविधिपटलः

अथातस्संप्रवक्ष्यामि अष्टबन्धविधिक्रमम्।
सर्वपापहरं पुण्यं सर्वसिद्धिकरं शुभम्॥ १ ॥
राजराष्ट्रविवृध्यर्थं सर्वलोकशुभाप्रदम् ।
सर्वदोषनिवृत्त्यर्थम् अष्टबन्धनमाचरेत् ॥ २ ॥
अष्टबन्धं यदा हीनं राजा दुर्जयमाप्नुयात् ।
यक्षराक्षसपैशाचैर्लोकपीडा प्रजायते॥ ३ ॥
अष्टबन्धनहीने तु पूजानैवेद्यमेवच ।
बलिं नित्योत्सवं चैव नमस्कारं प्रदक्षिणम्॥ ४ ॥

नृत्तं गीतं च वाद्यं च नित्यं नैमित्तिकं तथा।

उपचाराणि सर्वाणि निष्फलानि भवन्ति हि॥५॥

पूर्वे तु कलहं विद्याद् आग्नेय्यामग्निदाहकम्।

याम्ये तु व्याधिपीडा च नैर्ऋत्यां ग्रामनाशनम्॥६॥

वारुण्यां वर्षनाशस्स्याद् वायव्यांसस्यनाशनम्।

सौम्ये त्वर्थविनाशश्च ऐशान्यां पुत्रनाशनम्॥७॥

परितो बन्धहीने तु सर्वनाशकरं भवेत्।

शक्तिस्थानेषु निर्माल्यं शैववर्गो विनश्यति॥८॥

विष्णुभागे तु निर्माल्यं नृपवर्गो विनश्यति।

ब्रह्मभागे तु निर्माल्यं ब्रह्मवर्गो विनश्यति॥९॥

नन्द्यावर्तशिलाभागे विट् छूद्रादि विनश्यति।

कूर्मस्थाने तु निर्माल्यं सर्वनाशकरं भवेत्॥१०॥

तस्मात्सर्वप्रयत्नेन अष्टबन्धनमाचरेत्।

वित्तं शिवान्तिकं कृत्वा शिवमाराधयेन्नरः॥ ११॥

भक्त्या वित्तानुसारेण प्रकुर्यादष्टबन्धनम्।

कल्पयेद्विधिना तुल्यं फलमाढ्यदरिद्रयोः॥ १२॥

वित्ताशाठ्यं च यःकुर्याद् द्रव्येणाढ्योऽपि मानवः।

न तत्फलमवाप्नोति लोभेनाक्रान्तमानसः॥ १३॥

स्वस्य द्रव्यं त्रिधा भज्य जीवनायैकमादिशेत्।

भागद्वयं च धर्मार्थं यतो नित्यं च जीवति॥ १४॥

धर्मद्रव्यं स्वर्णपात्रे स्थापयित्वा शिवाय च।

सहिरण्यं प्रदातव्यं प्रीतिपूर्वं शिवार्पितम्॥ १५॥

भक्त्या त्वत्यन्तया युक्ता राजानो वा स्वकैर्धनैः।

शिवधर्मान् प्रकुर्वन्तु तत्र शाठ्येन ते जनाः॥ १६॥

न कुर्वन्तश्च वित्तस्य वित्तशाठ्यं तु दोषकृत्।

अल्पवित्तदरिद्राश्च याचयित्वा धनं बहु॥ १७॥

शिवधर्मान् प्रकुर्वन्तु वित्तशाठ्यं न कारयेत्।

याचकाप्तधनाश्चैव फलमश्नन्ति भूयशः॥ १८॥

येन केनाप्युपायेन धनं संचय्य मानवाः।

संग्रहेत् कर्तृधर्मिष्ठः शिवधर्मान् चिरन्तनान्॥ १९॥

शिवधर्मान् समुद्दिश्य याचयित्वा धनं बहु।

दुर्लभो मानुषो धर्मःशिवधर्मोऽपि दुर्लभः॥ २०॥

बहुजन्मकृतात्पुण्याज्जीवोऽप्युभयभाग्भवेत्।

येनकेनाप्युपायेन शिवधर्मान् चरन्ति ये॥ २१॥

इष्टान् भोगान् परं प्राप्य महीयन्ते जनाःपरैः।

शिवलोके शिवेनैव सह वा सञ्चरन्ति ते॥ २२॥

शिवधर्मान् समुद्दिश्य प्रतिगृह्णन्ति ये जनाः।

धनं ददाति यो लोके आप्नुयातामुभावपि॥ २३॥

इष्टसिद्धिं च सामीप्यं नात्र कार्या विचारणा।

शिवधर्मं समुद्दिश्य याचका धनदास्तथा॥ २४॥

प्रेरका मोदकाश्चैव कर्तारःकारकास्तथा।

आप्नुयास्तु परं ते ते शिवसामीप्यमञ्जसा॥ २५॥

शिवधर्मं समुद्दिश्य समार्जित धनं जनः।

स्वर्णपात्रे स्थापयित्वा द्रव्यशुद्धिं समाचरेत्॥ २६॥

अस्त्रेण च शतं जप्त्वा होमयेद्देशिकोत्तमः।

तेन द्रव्यस्य शुद्धिस्स्यात् शुद्धद्रव्यं शिवाय च॥ २७॥

निवेद्य गुरवे पश्चात् शिवधर्मं समाचरेत्।

प्रथमं सद्यबन्धं स्यात् क्रमाद्बन्धं द्वितीयकम्॥ २८॥

परितो बन्धहीनं च तृतीयं बन्धनक्रमम्।

यावदङ्गुलविच्छिन्ने सद्योबन्धनमाचरेत्॥ २९॥

नित्यस्नपनवेद्यां वै शिवाग्रे स्थण्डिलं कुरु

तदूर्ध्वे कलशान् स्थाप्य स्नपनोक्तं प्रपूजयेत्। ३०॥

घटाग्रे होमकार्याणि कृत्वा तु विधिवद्बुधः।

सन्धानमष्टबन्धेन कृत्वा गव्याभिषेचनम्॥ ३१॥

कलशैरभिषेकं च क्षीरभा(धा?)राभिषेचनम्

नैवेद्यं दापयेच्छंभोः सद्यबन्धनकर्मणि॥ ३२॥

द्वादशाङ्गुलविच्छिन्ने क्रमाद्बन्धनमुच्यते ।

तोरणं कुण्डवेदिं च यागशालां प्रकल्पयेत्॥ ३३॥

लिङ्गमूर्तिं समादाय कुम्भे संयोजयेत् क्रमात् ।

यागपूजाप्रकारेण पूजाहोमं समाचरेत्॥ ३४॥

पूर्ववद्बन्धनं कृत्वा रात्रिशेषं समाप्य च ।

अभिषेकं प्रभाते च क्रमाद्बन्धं समाचरेत् ॥ ३५॥

परितो बन्धविच्छिन्ने नन्द्यावर्तविहीनके ।

लिङ्गस्याधारपादे च लिङ्गे चलनसंयुते॥ ३६ ॥

तद्राज्यनाशनं प्रोक्तं नृपतेर्भयमुद्भवेत् ।

तस्मात्सर्वप्रयत्नेन पुनस्सन्धानमाचरेत्॥ ३७॥

अथ बन्धक्रियास्सर्वाः कथ्यन्ते क्रमशोऽधुना ।

सप्ताहमुत्तमं प्रोक्तं नवाहं मध्यमं भवेत् ॥ ३८॥

पक्षाहमधमं ज्ञेयं लिङ्गं स्वायम्भुवस्य तु (वं यदि?) ।

मानुषाणां तु लिङ्गानां मासमेकघटेस्थितिः ॥ ३९॥

नवाहं वाथ पञ्चाहं मासान्तं वाथपूर्वके ।

तदूर्ध्वे कुम्भसंस्थंचेद् देवेशस्यदोषकृत् ॥४०॥

तस्मात्सर्वप्रयत्नेन मासान्तंवाथपूर्वकम् ।

कुम्भस्थं योजयेल्लिङ्गे अभिषेकमथाचरेत्॥ ४१ ॥

अङ्कुराहं समारभ्य त्रिपञ्चनवसप्तके ।

यागं कुर्याद्विशेषेण तद्विधानमिहोच्यते ॥ ४२ ॥

द्विकालं च त्र्याहे तु षद्कालं दिनपञ्चके ।

सायं प्रातःक्रमेणैव दिनमेकं प्रशस्यते॥ ४३ ॥

अङ्कुरादि प्रतिष्ठान्तं दिनसंख्या प्रकीर्तिता

सद्योऽधिवासने चैव एकाहे दिवि होमयेत्॥ ४४ ॥

सर्वमासेषु कर्तव्यम् अष्टबन्धन कर्म च।

तिथिवारमुहूर्तादीन् वर्जयेत्तु विचक्षणः ॥ ४५ ॥

अष्टबन्धं त्रिबन्धं च पञ्चबन्धन मेव च ।

लिङ्गपीठान्तरे चैव प्रतिमायां तथैव च॥ ४६ ॥

बन्धयेत्तु विधानेन अष्टबन्ध त्रिबन्धनम्।

सृष्टिस्थितिश्च संहारं कारयेत्तु विचक्षणः॥४७॥

वर्धनं चाष्टबन्धं स्याद् श्रीकरं पञ्चबन्धनम् ।

मोक्षं चैव त्रिबन्धं स्याद् बन्धयेत्तु विधानतः॥४८॥

काषायं शर्कराचूर्णं रक्ततूलं च गव्यकम् ।

लाक्षाचूर्णं मधूच्छिष्टं गुग्गुलुं कुन्दनिष्ककम् ॥४९॥

त्रिभागं शर्कराचूर्णं गुग्गुलू च द्विभागकम्।

लाक्षाचूर्णं भागमेकं काषायं च त्रिपादकम्॥५०॥

मधूच्छिष्टं त्रिपादं च तथा च रक्ततूलकम् ।

नवनीतं त्रिपादं च हिङ्गुलं पादमुच्यते॥५१॥

हिङ्गुलस्यापिहीने तु बन्धनं बलहीनकम् ।

एतद्द्रव्यं च प्रस्थेन भागं कुर्याद्यथाक्रमम् ॥५२॥

कराभ्यां मर्दयित्वाथ बन्धयेद्देशिकोत्तमः ।

अथवान्यप्रकारेण कर्तव्यो बन्धनक्रमः ॥ ५३ ॥

गुग्गुलुं च पलं नाडी बाण भागा तु शर्करा ।

पलमेकन्तु काषायं लाक्षार्धपलमुच्यते ॥ ५४ ॥

मधूच्छिष्टं तदर्धं तु तदर्धं हिङ्गुलं तथा ।

तस्यार्धं तूलमेवन्तु नवनीतेन मिश्रितम् ॥ ५५ ॥

तूलस्य पलमात्रेण हस्ताभ्यां मिश्र्यमर्दयेत् ।

अष्टबन्धनमेवोक्तं पञ्चबन्धमतःपरम् ॥ ५६ ॥

लाक्षा शर्करपाषाणं माहिषं कुन्दनिष्ककम् ।

मधूच्छिष्टसमायुक्तं पञ्चबन्धनमुच्यते ॥ ५७ ॥

शर्करा नवनीतं च कुन्दनिष्कं त्रिबन्धनम् ।

स्वयंभौ दैविके बाणे बन्धयेच्च त्रिबन्धनम् ॥ ५८ ॥

दिव्ये च गाणवे चैव आर्षके पञ्चबन्धनम् ।

मानुषे राक्षसे चैव प्रतिमायाश्च पीठके॥ ५९ ॥

परिवरादिसर्वेषु बन्धयेच्चाष्टबन्धनम् ।

स्वर्णेन रजतेनैव सीसेनैव तु बन्धयेत्॥ ६० ॥

अपक्वं पक्वमेवं तु द्विविधोबन्धनक्रमः।

पक्वंतु पाकयोग्यं स्याद् अपक्वं मर्दनंभवेत्॥ ६१ ॥

पक्वापक्वपदं ज्ञात्वा बन्धयेत्सुदृढं बुधः।

अपक्वं दैविकं प्रोक्तं पक्वञ्चैवतु मानुषम्॥ ६२ ॥

अपक्वं बन्धनं प्रोक्तं सुपक्वमधुनोच्यते।

ततोऽष्टबन्धनं कुर्यात् तैलं गौलं च गैरिकम्॥ ६३ ॥

निवेद्य च गुरुं पश्चात् शिवधर्मान् समाचरेत्।

शिवसङ्कल्पितद्रव्यम् एकादश विभाजयेत्॥ ६४॥

भागत्रयं च यागार्थम् एकभागोऽभिषेचने ।

ऋत्विग्भ्यस्त्वेकभागः स्याद् आचार्यायतथैव च॥ ६५॥

विप्राणां भोजनार्थाय भागद्वितयमेव हि।

तथा भागद्वयं ज्ञेयं जपदानार्थकं भवेत्॥ ६६॥

त्रिपक्षयजनार्थाय अवशिष्टं समाचरेत्।

यागार्थ मण्टपं कुर्याद् हर्म्याग्रे वाथ पार्श्वयोः॥ ६७॥

ऐशान्यां पावके चैव अथवा चान्यदेशके।

अथवा संकटस्थाने योग्यरूपेण कल्पयेत्॥ ६८॥

भूमिं संशोध्य जान्वन्तं समीकृत्योपलिप्य च ।

मुष्टिमात्रं समुत्सेधं दर्पणोदरसन्निभम्॥ ६९॥

शिवयज्ञे विशेषेण पञ्चहस्तप्रमाणतः।

एकहस्तविवृध्द्या तु मनुहस्तसमावधि॥ ७०॥

चतुरश्रं ततःकृत्वा पदविन्यासमाचरेत्।

पूर्वाग्रं रविसूत्रं स्याद् उदगग्रं तथैव च॥ ७१ ॥

एकविंशाधिकशतं पदभागःसमीरितः।

मध्ये त्वेकपदे ब्राह्मे प्रधानं वर्धनीं तथा॥ ७२ ॥

दैविकेऽष्टपदे कुम्भान् पैशाचं षोडशं भवेत्।

पूजार्थं च चतुर्दिक्षु विदिक्षु स्तम्भमुच्यते॥ ७३ ॥

शिष्टमष्टपदे चैव अष्टमङ्गलमीरितम् ।

षट्पञ्चाशत्पदे बाह्ये राक्षसे घटतोरणम्॥ ७४ ॥

आचार्यशिष्यसञ्चारंयोग्यंशिष्टपदं भवेत् ।

स्तम्भस्थानं पदे बाह्ये इत्येवं पदसंस्थितिः॥ ७५॥

षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव च ।

मण्डपं वा चतुष्कं वा शालां वापि प्रकल्पयेत्॥ ७६ ॥

मण्डपस्य तु तन्मध्ये पदे नन्दे तु वेदिका ।

विस्ताराधं समुत्सेधं चतुरश्रं समन्ततः॥७७॥

द्वादशाङ्गुलमुत्सेधं षडङ्गुलसुस्विस्तरम् ।

मुकुरोदरसंकाशम् उपवेदि च कारयेत्॥७८॥

कुण्डानि परितः कुर्यात् मानुषे तु पदेऽभितः।

युगाश्रं योनि शशभृत् त्र्यश्रं बाणाश्रमेव च॥७९॥

षडश्रं पद्ममष्टाश्रम् ऐन्द्रादिषु प्रकल्पयेत् ।

रुद्राखण्डलयोर्मध्ये मूलपीठाकृतिर्यथा॥८०॥

तथा कुण्डाकृतिः प्रोक्ता प्रधानं कुण्डमुच्यते ।

पञ्चाग्न्यायतने कुण्डं विदिक्षु परिवर्जयेत्॥८१॥

एकाग्न्यायतने कुण्डं वेद्याःपश्चिमतो न्यसेत् ।

इन्द्रादिनवकुण्डं तु अष्टभोगादि सिद्धितम्॥८२॥

पञ्चकुण्डफलं प्रोक्तम् अभीष्टसिद्धिदायकम् ।

श्रीकरम् एककुण्डं च गोमयेनोपलेपयेत् ॥ ८३ ॥

पुण्याहं वाचयेत्तत्र ब्राह्मणान् भोजयेत्ततः ।

पश्चादुच्छिष्टमुद्वास्य पुनः पुण्याहमाचरेत् ॥ ८४ ॥

अङ्कुरात् पूर्वदिवसे आचार्यो ऋत्विग्भिस्सह ।

वपनं देहशुद्ध्यर्थम् आचरेत्तु यथाक्रमम् ॥ ८५ ॥

अधिवासदिनात्पूर्वं नित्यपूजावसानके ।

विघ्नेशं मूलबेरञ्च संपूज्य च विशेषतः ॥ ८६ ॥

उत्तराभिमुखो भूत्वा तत्रादौ गणनायकम् ।

ध्यात्वा सङ्कल्पयेद्धीमान् विधिवद्देशिकोत्तमः ॥ ८७ ॥

धूपदीपादिना पूज्य ताम्बूलं नालिकेरकम् ।

निवेद्य मूर्तिपैस्सार्धम् अनुज्ञां कारयेद्गुरुः ॥ ८८ ॥

विघ्नानपोहयात्राशु प्रसीद गणनायक ।

प्रार्थ्यैवं शुभनक्षत्रे सुदिने चरलग्नके॥ ८९॥

मूललिङ्गं समासाद्य ह्युत्तराभिमुखःस्थितः ।

प्राणायामं पुरा कृत्वा सङ्कल्पञ्च ततःपरम्॥ ९०॥

अष्टपुष्पैः समभ्यर्च्य ताम्बूलादि निवेदयेत्।

शिव सर्वजगन्नाथ सदाशिव नमोस्तु ते॥ ९१॥

अष्टबन्धविधानार्थम् अनुज्ञां देहि मे प्रभो ।

तथास्त्विति शिवेनोक्तं लब्धानुज्ञः शिवाज्ञया॥ ९२॥

देव्यादिबन्धविच्छिन्ने तदन्तिकमनुव्रजेत् ।

अनुज्ञां कारयेद्विद्वान् मृत्सङ्ग्रहणामारभेत्॥ ९३॥

एतान् देवान् पुरस्कृत्य सर्ववाद्यसमन्वितः।

उत्तमं प्रागुदीची स्यान्मध्यमं दक्षिणंस्मृतम्॥ ९४॥

अधमं पश्चिमं प्रोक्तं निर्व्रजेद्देशिकोत्तमः ।

नदीतीरे बिल्वमूले तटाके तुलसीवने॥ ९५॥

केदारे दर्भमूले च वल्मीके नन्दने वने।

अश्वत्थमूलदेशे वा गत्वाऽऽचार्यौ विधानतः॥ ९६॥

शुद्धदेशमनुप्राप्य पुण्याहं वाचयेद्गुरुः।

शालिभिस्तण्डुलैश्चैव कल्पयेत्स्थण्डिलं तिलैः॥ ९७॥

तन्मध्ये षट्दलं न्यस्य स्थापयेत्सप्तकुम्भकान् ।

कूर्चपल्लवसंयुक्तान् सरत्नसलिलान्वितान्॥ ९८॥

मध्याद्दलाग्राकुम्भेषु पूजयेत्सप्तवारिधीन् ।

अथवात्वेककुम्भे तु विन्यसेत्सप्तवारिधीन्॥ ९९॥

नैवेद्यधूपदीपादीन् कल्पयेत्तुविशेषतः।

नवकोष्ठान् समालिख्य कुम्भाग्रे स्थण्डिलोपरि॥ १००॥

मध्ये ब्रह्माणमभ्यर्च्य ह्यनन्तादि जयान्तकम् ।

पूर्वादिकोष्ठमध्येतु इन्द्रादीनर्चयेद्बुधः ॥ १०१ ॥

पूजयित्वा यथान्यायं स्वाहान्ते बलिमाचरेत् ।

बलिमण्डलपूर्वे तु भूमिदेवीं समर्चयेत् ॥ १०२ ॥

खनित्रं पूजयेत्तत्र प्राङ्मुखो वाप्युदङ्मुखः ।

प्राक्छिरोर्ध्वाननां देवीं चित्राकारां विचिन्तयेत् ॥ १०३ ॥

कुक्षिदेशे मृत्शुद्धं मस्तके राष्ट्रनाशनम् ।

पार्श्वयोराजनाशं च पादे कर्ता विनश्यति ॥ १०४ ॥

गले तु स्थापकनाशः कट्यां स्थपतिर्नश्यति ।

परितो ग्रामनाशश्च मृदं कुक्षेस्तु संग्रहेत् ॥ १०५ ॥

खनित्रेण त्रिधा खात्वा मृदं संगृह्य पात्रके ।

वाहयित्वा यथोक्तेन वस्त्रेणाच्छादयेद्बुधः ॥ १०६ ॥

भूमिदेव्याः कुक्षिदेशे खातदोषनिवृत्तये ।

व्रणोपशमनार्थाय सेचयेत्सप्तवारिधीन्॥ १०७॥

अब्धिकुम्भान् समादाय मृदि विन्यस्य सेचयेत् ।

परिचारकमाहूय शिबिकायां गजेऽपिवा॥ १०८॥

वाहयित्वा मृदं पश्चान्नृत्तगीतसमन्वितः।

ग्रामप्रदक्षिणं कृत्वा प्रासादं प्रविशेद्गुरुः॥ १०९॥

रवेरस्तमनादूर्ध्वं पञ्चनाड्यां सुलग्नके ।

अथवा सप्तनाड्यन्ते कारयेदङ्कुरार्पणम्॥ ११०॥

अनङ्कुरं तु यत्कर्म तत्कर्म निष्फलं भवेत् ।

अङ्कुरादङ्कुरं नास्ति कृतं चेत् कर्मनाशनम्॥ १११॥

एकालयेच द्वौ यागौ स्नपनं वास्तुशान्तिकम् ।

एकत्रैव प्रकर्तव्यम् उत्सवादौ विना चरेत्॥ ११२॥

प्रासादस्योत्तरे देशे दक्षिणे वाग्रदेशके ।

ऐशान्यां यागशालायां वायव्यां वापयेद्गुरुः ॥ ११३ ॥

स्थण्डिलं शालिभिः कुर्यात् पदविन्याससंयुतम् ।

प्राङ्मुखं पञ्च सूत्राण्युदङ्मुखं तथैव च ॥ ११४ ॥

मध्ये चतुष्पदं कृत्वा सोमकुम्भं प्रपूजयेत् ।

कल्पयित्वासनध्यानैः मूलेनावाह्य पूजयेत् ॥ ११५ ॥

नैवेद्यधूपदीपान् दत्वा संप्रार्थयेद्गुरुः ।

पालिका घटिकाश्चेति शरावास्तु क्रमाद्गुरुः ॥ ११६ ॥

ईशानादि समारभ्य प्रत्येकं युगसंख्यया ।

ब्रह्मा विष्णुश्च रुद्रश्च पालिकाद्यधिदेवताः ॥ ११७ ॥

क्रमेण द्वादशादित्यान् पालिकादिषु पूजयेत् ।

तिलसर्षपमुद्गानि माषशिंबाढकानि च ॥ ११८ ॥

कुलुत्थं यवगोधूमं नवबीजानि संग्रहेत् ।

जलेन क्षालयेद्द्रव्यं क्षीरसेकेन वापयेत्॥ ११९॥

चन्द्रकुम्भस्थतोयेन सेचयेत् पालिकादिकान्।

कुम्भे चलासनं पूज्य पूर्वोक्तविधिना सह॥ १२०॥

गुलखण्डं च ताम्बूलं पायसादीन् निवेदयेत् ।

धूपदीपोपचारैश्च प्रणम्य प्रार्थयेद्गुरुः॥ १२१॥

जपं समर्प्य विधिवत् पश्चात् सूत्रस्य धारणम् ।

उत्सवे च चतुर्विंशत् पवित्रे षोडशस्मृतः॥ १२२॥

संप्रोक्षणाद्यष्टबन्धेषु पालिका द्वादश स्मृताः ।

व्रतादिनियमार्थाय रक्षासूत्रस्य धारणम्॥ १२३॥

ताम्बूलं भस्मसंयुक्तं तण्डुलं नालिकेरकम् ।

स्वर्णादिनिर्मितं सूत्रम् अष्टनागान् प्रपूजयेत्॥ १२४॥

उत्तमं होममाख्यातं मध्यमं होमवर्जितम् ।

होमकुम्भौ विना यत्र सूत्रधारं तु कन्यसम्॥ १२५॥

निर्दिष्टदिवसात्पूर्वे रात्रौ कौतुकबन्धनम् ।

अभावे तद्दिनेवापि क्रियापूर्वेऽथवा सुधीः॥ १२६॥

तत्कर्ममन्त्रसिद्ध्यर्थं सूत्रमावश्यकं भवेत् ।

अहन्यहनि संपूज्य निर्दिष्टदिवसावधि॥ १२७॥

निर्दिष्टदिवसे प्राप्ते सोममुद्वासयेत्सुधीः।

अङ्कुरांश्च जले क्षिप्त्वा कौतुकं तु विसर्जयेत्॥ १२८॥

यागमण्टपशुद्ध्यर्थं वास्तुदेवान् समर्चयेत् ।

यागस्य मण्टपे मध्ये बलिपीठाग्रकेऽपि वा॥ १२९॥

ब्रह्मस्थाने मण्टपादौ वास्तुयागं समाचरेत्।

नवहस्तसमायुक्तं वेदिकुण्डसमन्वितम्॥ १३०॥

चतुर्द्वारसमायुक्तं मण्टपं कारयेत्ततः ।

एकाशीतिपदे मध्ये वेद्यां ब्रह्मादिकान् न्यसेत् ॥ १३१ ॥

धर्मराजे गुरोः स्थानं नैर्ऋत्यां पञ्चगव्यकम् ।

पर्यग्निकरणं पाशौ वायौ यागोपसाधनम् ॥ १३२ ॥

उत्तरे ब्रह्मकुम्भः स्यादैशान्याम् अस्त्रराजकम् ।

ब्रह्माणं प्राङ्मुखोऽभ्यर्च्य घटे च मण्डलेयजेत् ॥ १३३ ॥

तदग्रे वन्हिकार्यं तु वन्हिमभिमुखाननम् ।

रात्रौ कुर्याद्बलिं विद्वान् आदिग्रामादिवास्तुषु ॥ १३४ ॥

रात्रौ वाथ दिवा वापि देवदेव्यालयादिषु ।

मण्डूकं देवतानां च वास्तूनाञ्च शिवं भवेत् ॥ १३५ ॥

देवीनामन्यशक्तीनां शुभं परमशायिकम् ।

विघ्नसङ्घं निहन्त्याशु इष्टकाम्यार्थसिद्धिदम् ॥ १३६ ॥

तत्कर्ममन्त्रसिद्ध्यर्थं वास्तुयागंसमाचरेत् ।

वास्तुयागं न कुर्याच्चेत् कर्तृराष्ट्रविनाशनम् ॥ १३७ ॥

तस्मात्सर्वप्रयत्नेन वास्तुयागं समाचरेत् ।

वेदिमध्येविशेषेण तण्डुलैश्च तिलैरपि ॥ १३८ ॥

प्रागग्रं नवसूत्राणि उदग्ग्रं तथैव च ।

चतुष्षष्टिपदं कुर्यात् कर्णसूत्रसमन्वितम् ॥ १३९ ॥

चतुश्शूलं चतुर्वृत्तं रज्ज्वष्टकविभूषितम् ।

मर्मद्वादशकोपेतं मण्डूकं परिकल्पयेत् ॥ १४० ॥

सङ्कल्प्य विघ्नराट्पूजां पुण्याहोदकसेचनम् ।

पञ्चगव्यार्घ्यसलिलैः सेचयेद्देशिकोत्तमः ॥ १४१ ॥

कुर्वीत मण्टपाद्येषु यथोक्तविधिना गुरुः ।

मध्ये चतुष्पदे ब्रह्मा चतुर्दिक्षु यथाक्रमम् ॥ १४२ ॥

षड्वद्वदानि संमृज्य समर्यादीन् यथाक्रमम् ।

आपापवत्सकद्वन्द्वम् उक्तस्थाने प्रपूजयेत्॥ १४३ ॥

ईशादिकोणकार्धार्धपदानां भोगिनःक्रमात् ।

बहिर्वीथिचतुष्कोणेषु अर्धैकपदभोगिनः॥ १४४॥

अन्ये त्वेकैकमेकं च शूलवृत्तं तथैव च ।

तत्र स्थितास्त्रिपञ्चाशद्देवतावाहनं क्रमात्॥ १४५॥

गन्धपुष्पैस्समभ्यर्च्य ताम्बूलादि निवेदयेत् ।

सूत्रमध्ये बलिं विद्वान् त्रयोदश पदे क्षिपेत्॥ १४६ ॥

पदमध्ये बलिं कुर्याद् द्वात्रिंशन्मूर्तिसंख्यया ।

विकिरार्धपदे चैव बलिमष्टौ समाचरेत्॥ १४७॥

त्रिपञ्चाशद्बलिं दद्याद्यथोक्तविधिना गुरुः ।

दध्याज्य गुळसंमिश्रं शाल्यन्नं ब्रह्मणे बलिः ॥ १४८॥

समर्यादिचतुर्णां तु पायसं बलिरुच्यते ।

विदिक्ष्वापादिदेवानाम् अष्टानां कृसरान्नकम्॥ १४९॥

ईशाद्यावृत्तदेवानां मुद्गान्नं बलिरुच्यते ।

अष्टानां बाह्यदेवानां मांसान्नं बलिरुच्यते॥ १५०॥

अभावे माषसंमिश्रं बल्यन्नं समुदाहृतम् ।

एवं संपूजयेत् पश्चात् कलशान् स्थापयेद्गुरुः॥ १५१॥

उत्तरे पश्चिमे वापि वृत्तवत्स्थण्डिलं कुरु ।

स्नपनोक्तप्रकारेण वास्तुकुम्भान् प्रपूजयेत्॥ १५२॥

मध्ये ब्रह्माणमभ्यर्च्य वास्तुदेवान् समर्चयेत् ।

भारतीं तस्य वामे तु पूर्वादि कलशान्न्यसेत्॥ १५३॥

त्रयीमयस्तृमूर्तिश्च पद्माक्षः पद्मयोनिकः ।

चतुर्मुखश्च धाता च पितामहो ह्यजस्तथा॥ १५४॥

मूर्तयोऽष्टौ समभ्यर्च्यास्त्वथवा लोकपालका: ।

गन्धपुष्पैस्समभ्यर्च्य नैवेद्यादि प्रदापयेत्॥ १५५॥

समर्यकपदे तत्र होमस्थानं विधीयते ।

कुण्डे वा स्थण्डिले वापि अग्निकार्यं समाचरेत्॥ १५६ ॥

वास्तुब्रह्मादिदेवादीन् अग्निमध्ये प्रपूजयेत् ।

पूर्वमाज्याहुतिं हुत्वा ह्यष्टाविंशच्छताधिकम्॥ १५७॥

समिल्लाजान्नद्रव्यादीन् दशांशं होमयेत्क्रमात् ।

द्रव्यान्ते व्याहृतिर्हुत्वा पश्चाद्देवान् हुनेत्क्रमात्॥ १५८॥

समर्यकादिदेवानां हुत्वा वै तद्दशांशकम् ।

आपादीनामथाष्टनाम् अष्टौ प्रत्येकमाहुती: ॥ १५९॥

ईशानाद्यादि देवानां प्रत्येकं पञ्चपञ्च च ।

चरक्याद्यष्टदेवानां होमं कुर्यात्त्रयाहुती: ॥ १६०॥

तद्वदेव चरुं हुत्वा चरक्यै क्रव्यमाहुनेत् ।

हुनेत्प्रतिनिधिद्रव्यैः कूष्माण्डादिभिरेव च ॥ १६१ ॥

मांसाभावे तथाकुर्याद् देशिको बीजवर्जितः ।

कूष्माण्डं खड्गमन्त्रेण भित्वा हुत्वास्त्रुवेण तु ॥ १६२ ॥

पूर्णाहुतिं ततो हुत्वा धूपदीपं समाचरेत् ।

अग्निस्थं च पदे योज्य पदस्थं कुंभके यजेत् ॥ १६३ ॥

कुम्भस्थं हृदये योज्य पर्यग्निकरणं मतम् ।

पर्यग्निशुद्धिराख्यातः सर्वदोषौघदाहकः ॥ १६४ ॥

कुम्भोदकेन वीथ्याञ्च शुद्ध्यर्थं प्रोक्षयेद्गुरुः ।

तज्जलेनैव शुद्धिः स्यात् होमकर्मविवर्धनम् ॥ १६५ ॥

पलाशशुष्कदर्भाद्यैः मुष्टिं कृत्वा दृढं पुनः ।

संप्रोक्ष्य हृदयेनैव संप्रज्वाल्य तदग्निना ॥ १६६ ॥

यागधामादिशुद्ध्यर्थं पर्यग्निकरणं कुरु ।

पञ्चगव्येन संप्रोक्ष्य वर्धनीतोयसंयुतम्॥ १६७॥

सर्वातोद्यसमायुक्तम् अस्त्रदेवसमन्वितम्।

एवं प्रदक्षिणं कृत्वा उल्कां बाह्ये त्यजेद्बुधः॥ १६८॥

पुण्याहं वाचयेद्विद्वान् सर्वत्र प्रोक्षयेद्गुरुः।

प्रभाते विमले धीमान् विधिवत् स्नानमाचरेत्॥ १६९॥

वस्त्रैराभरणैर्भूष्य नित्यकर्म समापयेत् ।

आरभेच्छिपूजां च प्रसन्नाख्यां विधानतः॥ १७०॥

शिवप्रसन्नपूजार्थं स्नपनोक्तं समाचरेत् ।

प्रयाश्चित्तं पुरा कृत्वा होमसंख्यां हुनेत्क्रमात् ॥ १७१॥

गर्भगेहं प्रविश्याथ पूजयेत्तु यथाविधि ।

नैवेद्यधूपदीपादीन् उपचारान् समाप्य च॥ १७२॥

प्रसन्नयजनस्यार्थं कृत्वालङ्करणाय च ।

यागशालां विशोद्धीमान् कृत्वालङ्करणादिकम् ॥ १७३ ॥

चतुर्दिक्षु चतुर्द्वारं चतुस्तोरणभूषितम् ।

अष्टदिक्षु ध्वजानाष्टौ लम्बयेत्तु प्रदक्षिणम् ॥ १७४ ॥

पूर्वे नीलांशुकं प्रोक्तम् आग्नेय्यां रक्तचेलकम् ।

दक्षिणे कृष्णचेलं स्यात् धूम्रचेलं तु नैर्ऋते ॥ १७५ ॥

शङ्खाभं वारुणे चेलं वायव्यां शबलांशुकम् ।

उत्तरे काञ्चनं चेलम् ऐशान्यां पीतवस्त्रकम् ॥ १७६ ॥

त्रैयोदशाङ्गुलायामं विंशत्यङ्गुलदैर्घ्यकम् ।

विस्तारेण समं पुच्छं तदर्धं शिखरं भवेत् ॥ १७७ ॥

चतुःपुच्छं त्रिपुच्छं वा पुच्छद्वयमथाऽपिवा ।

ध्वजमध्ये लिखेद्धीमान् दिग्गजांश्च विशोषतः ॥ १७८ ॥

पार्श्वे तु गणिकायुक्तं वेत्रद्वयसमायुतम् ।

नवहस्तं चाष्टहस्तं सप्तहस्तमथाऽपि वा॥ १७९॥

शेषं च ध्वजवत्कुर्यात् नानावस्त्रैश्च कारयेत् ।

पताकालक्षणं प्रोक्तं क्षुद्रध्वजविधिं श्रृणु ॥ १८०॥

बाणाङ्गुळं तु विस्तारं द्वादशाङ्गुळदैर्घ्यकम्।

वेत्रद्वयसमायुक्तं शेषं केतुकवत् कुरु॥ १८१॥

क्षुद्रध्वजविधिःप्रोक्तःशिखरे पुच्छसंयुतम् ।

तिथिहस्तयुतं वापि अर्कहस्तमथापिवा॥ १८२॥

रन्ध्रहस्तयुतं वापि चारुरज्जुसमायुतम् ।

नानावर्णसमायुक्तं नानारूपसमायुतम्॥ १८३॥

एवं तरङ्गमाख्यातं स्तम्भवेष्टनमुच्यते ।

कृष्णश्वेतं पूर्वभागे श्वेतरक्तं तु दक्षिणे॥ १८४॥

रक्तपीतं पश्चिमे स्यात् पीतकृष्णमुदग्दिशि।

गात्रायामसमं वस्त्रं निश्छिद्रं तेन वेष्टयेत् ॥ १८५॥

रक्तपट्टदुकूलाद्यैःकुर्यात्कार्पासजातिना ।

षड्विंशद्धस्तदीर्घं स्याद् अष्टतालसुविस्तरम्॥ १८६ ॥

वितानं लम्बयेन्मध्ये यागवेश्मनि देशिकः।

रम्भाम्रनाळिकेरैश्च मुक्तादामसुपुष्पकैः ॥ १८७॥

इक्षुप्रवाळताम्बूललताभिश्च विभूषयेत्।

भूतवेदाग्निदर्भैश्च व्योमहस्तं प्रलम्बयेत्॥ १८८॥

अन्तरं चतुरङ्गुल्यं चूतपल्लवशोभितम् ।

अङ्गुष्ठप्परिमाणं स्याद् दर्भमालाभिरावृतम् ॥ १८९॥

गोमयेनोपलिप्याथ रङ्गवल्ल्यादि कारयेत्।

नानादीपसमायुक्तम् अष्टमङ्गळसंयुतम्॥ १९०॥

दशायुधसमायुक्तं पुण्याहाम्बुभिरूक्षयेत् ।

स्थण्डिलं शालिभिःकुर्याद् वेदिकोपरि मध्यमे॥ १९१ ॥

द्विशतैःपञ्चविंशत्या व्रीहिभिःपूरितं तु यत् ।

शक्तिमात्रमिति ज्ञेयं मानं तेनैव कारयेत्॥ १९२ ॥

शक्तिस्थलं प्रकुञ्जं च प्रसृतिःकुडुपं तथा ।

तथा स्यादञ्जलिःप्रस्थं पादञ्चाढकशैवकम्॥ १९३ ॥ ?

द्रोणं खारि क्रमात्प्रोक्तं द्विगुणं तु पृथक् पृथक् ।

खारित्रयं तु भारं स्याद् भारादूर्ध्वं न मानकम्॥ १९४ ॥

शालिभिस्तेन मानेन तण्डुलैरुडुसन्निभैः।

दशभारैश्च संपूर्य उत्तमं तत्प्रकीर्तितम्॥ १९५ ॥

अष्टत्रिंशत्तु द्रोणं स्यान्मध्यमं चेति कीर्तितम् ।

अधमं त्रिंशद् द्रोणैश्च कर्तव्यं देशिकेन तु॥ १९६ ॥

शाल्यर्धं तण्डुलं चैव तण्डुलार्धं तिलं तथा ।

तिलार्धं लाजमेवं तु सप्तधान्यं शिवत्रयम्॥ १९७॥

आढकं मुद्गमाषं च गोधि सर्षपमेव च ।

चणनिष्पावकं चैव सप्तधान्यैः प्रपूरयेत्॥ १९८॥

तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम् ।

द्वारादिपरिवाराणां द्रोणं द्रोणं प्रकीर्तितम् ॥ १९९॥

तण्डुलं च तिलं चैव तस्यार्धार्धं तथैव च ।

द्रोणद्वयं घटं शम्भोःस्वर्णेनैव तु कारयेत्॥ २००॥

सुदृढं रजतेनैव द्रोणपूर्णन्तु वर्धनीम् ।

शिवपूर्णघटानष्टौ ताम्रेणैव तु कारयेत् ॥ २०१॥

आढकेनैव पूर्णाःस्युःकलशाःसंप्रकीर्तिताः।

सर्वं ताम्रेण कर्तव्यं कांस्यं वा मृन्मयं तु वा॥ २०२॥

शक्त्या वित्तानुसारेण लक्षणोक्तं प्रकल्पयेत् ।

उत्तमं तिलमात्रेण मध्यमं यवमात्रकम् ॥ २०३ ॥

अथवाङ्गुलिमात्रेण अथवा गजनेत्रवत् ।

एकसूत्रं भवेद्व्याधिःद्विसूत्रमाभिचारके ॥ २०४ ॥

त्रिसूत्रं सर्वसिद्धिःस्यात् वेष्टयेत्तु प्रदक्षिणम् ।

त्रिसूत्रैर्वेष्टयेत्कुम्भं वर्धनीञ्च द्विसूत्रकम् ॥ २०५ ॥

कलशानेकसूत्राणि भाण्डेषु कलशेषु च ।

विप्रस्य कन्यया सूत्रं कर्तितं श्लाघ्यमेव च ॥ २०६ ॥

त्रिसूत्रमेकसूत्रं स्यात् तत्तिसूत्रंनवात्मकम् ।

गवाक्षसदृशं वेष्ट्य सद्योजातेति मन्त्रतः ॥ २०७ ॥

क्षालनं वामदेवेन धूपितं घोरमन्त्रतः ।

पुरुषेशानयोर्मन्त्रंमूलेचाग्रेचविन्यसेत् ॥ २०८ ॥

आपोवा इति मन्त्रेण वारिकुम्भेषु पुरयेत् ।

नादेयं वाथ कौपेयं शुचिना स्वच्छवारिणा॥ २०९॥

मृद्भाण्डे पूरयेत् तोयं शीतलेन सुगन्धिना ।

स्नानद्रव्यं च संगृह्य वस्त्रपूतेन पूरयेत् ॥ २१०॥

गन्धं मृगमदञ्चैव कर्पूरं कुङ्कुमं तथा ।

गोरोचना च कस्तूरी षङ्गन्धं चेति कीर्तितम्॥ २११॥

हिमसेचनसंमिश्रं कुम्भमध्ये सुपूरयेत् ।

उत्तमं दशनिष्कं स्यान्मध्यमं तु तदर्धकम् ॥ २१२॥

तदर्धमधमं ज्ञेयं प्रतिमां कारयेद्बुधः।

मनोन्मन्याश्च प्रतिमां तस्यार्धञ्चैव कारयेत् ॥ २१३॥

विद्येश्वरघटानान्तु तस्यार्धं हेमपट्टकम् ।

परिवारघटानान्तु तास्यार्धं हेमपट्टकम्॥ २१४॥

यादृशं प्रतिमाकारं तादृशं भाव्य बुद्धिमान् ।

सदाशिवस्य गौर्याश्च विद्येशबीजमालिखेत्॥ २१५॥

तत्तत्कुम्भस्य तन्मध्ये निक्षिपेत् देशिकोत्तमः।

श्रेष्ठं द्वादशनिष्कं स्यान्मध्यमं चाष्टनिष्ककम्॥ २१६॥

कन्यसं पञ्चनिष्कं स्यात् प्राधानस्य महोत्पलम् ।

नीलोत्पलं तु तस्यार्धं वर्धन्यां दापयेत्सुधीः॥ २१७॥

विद्येशानां तु तस्यार्धं हेमशूलं विधीयते ।

माणिक्यमिन्द्रनीलं तु वज्रं मरकतं तथा॥ २१८॥

वैडूर्यं स्फटिकं चैव पद्मरागं च मौक्तिकम् ।

प्रवालं नवरत्नानि कुम्भमध्ये विनिक्षिपेत्॥ २१९॥

वज्रं वडूर्यकं चैव इन्द्रनीलं च मौक्तिकम् ।

प्रवालं पञ्चरत्नानि वर्धन्यां निक्षिपेत्क्रमात्॥ २२०॥

माणिक्यं स्फटिकं वज्रं त्रिरत्नं कलशेष्वपि ।

स्वर्णयज्ञोपवीतं च पञ्चनिष्केण कारयेत्॥ २२१ ॥

सप्तनिष्कं तु स्वर्णेन रक्षासूत्रं तु कारयेत् ।

कौतुकं शातकुम्भेन रजतेनाथ तन्तुना॥ २२२ ॥

लिङ्गनाहसमं सूत्रं पीठे बेरेच तथैव हि ।

स्वल्पाधिकप्रमाणाढ्यं नागराजफणान्वितम्॥ २२३ ॥

तत्पुच्छसंयुतं सूत्रं पट्टाकारसमं तु वा ।

षड्विंशद्दर्भसंख्यैश्च निर्मितं कूर्चमुत्तमम्॥ २२४ ॥

दक्षिणावर्तरूपेण ग्रन्थिं कुर्याद्द्वयाङ्गुलम् ।

अग्रं वेदाङ्गुलं प्रोक्तं नालमष्टादशाङ्गुलम्॥ २२५ ॥

स्निग्धं समाग्रं श्यामं च शिवकुम्भे विनिक्षिपेत् ।

चतुर्दशाङ्गुलं नालं पञ्चविंशतिदर्भकैः ॥ २२६ ॥

अग्रं ग्रन्थिं च पूर्वोक्तं वर्धन्यां कूर्चमीरितम् ।

पञ्चदशदलैर्दर्भैः अग्रग्रन्थि त्रयाङ्गुलम् ॥ २२७ ॥

त्रयोदशाङ्गुलं नालं प्रमाणन्तु समायुतम् ।

विद्येशकलशानान्तु कूर्चं क्षिप्त्वा यथाक्रमम् ॥ २२८ ॥

ऊर्ध्वाग्रं पौष्टिकं प्रोक्तं अधोग्रं शान्तिकं भवेत् ।

कुर्यात् कूर्चक्रमेणैव ग्रन्थिं विमुखमाचरेत् ॥ २२९ ॥

कुम्भस्य चूतपत्राणि पञ्चविंशति विन्यसेत् ।

वर्धन्यां चूतपत्राणि कलान्यूनमितिस्मृतम् ॥ २३० ॥

कलशेष्वष्टपत्राणि षोडशाङ्गुलदैर्घ्यकम् ।

अथवा द्वादशाङ्गुल्यं साङ्गं चैव प्रकीर्तितम् ॥ २३१ ॥

कुम्भकण्ठसमं वृत्तं शरावाकृतिवत्कृतम् ।

तन्मध्ये रन्ध्रसंयुक्तं विन्यसेत् सापिधानकम् ॥ २३२ ॥

नालिकेरं तु कुम्भानां उत्तमाङ्गन्तु कथ्यते ।

दाडिमीफलं मध्यं स्यात् चूतरम्भेऽधमं भवेत्॥ २३३॥

देवाम्रं च तथाप्रोक्तं यथालाभं प्रकल्पयेत् ।

नालिकेरफलं प्रोक्तं शिरःकुम्भस्य उच्यते॥ २३४॥

तन्मुखं वक्त्रमेवं तु मुखे पूजां प्रकलपयेत् ।

एकत्रिंशद्दलैःकूर्चं कृत्वा कुम्भे न्यसेद्बुधः॥ २३५॥

एकविंशति दर्भैश्च वर्धन्यां विन्यसेद्बुधः ।

एकादशदलैःकुर्यात् ग्रन्थिरेकाङ्गुलं भवेत्॥ २३६॥

चतुरङ्गुलमानं हि ग्रन्थ्यग्रं चाभिशस्यते ।

आग्रन्थिमूलमानं हि मूर्धादि पादमुच्यते॥ २३७॥

इत्येतल्लक्षणं ज्ञेयं लम्बकूर्चस्य धीमता ।

उत्तमं रविहस्तं स्यान् मध्यमं दशहस्तकम्॥ २३८॥

अधमं चाष्टहस्तं स्यात् पञ्चतालसुविस्तरम् ।

वस्त्रद्वयेन संवेष्ठ्य तत्समं च दुकूलकम्॥ २३९ ॥

पीतं वा सुदृढं सूक्ष्मं शिवकुम्भे सुयोजयेत् ।

नवाष्टसप्तहस्तं च श्रेष्ठमध्यकनीयसम्॥ २४० ॥

तद्वद्दुकूलवस्त्राद्यैःवर्धन्यां वेष्टयेद्गुरुः।

विद्येशकलशानां तु हस्तषट्कं पृथक् पृथक्॥ २४१ ॥

कलशानां तु सर्वेषां चतुर्हस्तं विधीयते ।

त्रिंशद्धस्तं चोत्तमं स्यान् मध्यमं पञ्चविंशतिः ॥ २४२ ॥

अधमं विंशतिःप्रोक्तं षट्तालं च सुविस्तरम् ।

वेद्याप्रतिसरं वस्त्रं निश्छिद्रं तेन वेष्टयेत्॥ २४३ ॥

रुद्राक्षम् उपवीतं च उष्णीषं चोत्तरीयकम् ।

भस्मालयं च शैवानां पञ्चमुद्राःप्रकीर्तिताः ॥ २४४ ॥

विभूतिवलयं धार्यं द्वात्रिंशत् कण्ठदेशके ।

अष्टोत्तरशतं प्रोक्तं रुद्राक्षमालयान्वितम्॥ २४५॥

अक्षसूत्रं प्रकर्तव्यं सप्तविंशतिभिः क्रमात् ।

षट् सप्तपञ्चहस्तं वा बाणभागैकविस्तृतम्॥ २४६॥

सुश्लक्ष्णं सुदृढं सूक्ष्मं सितंरोमादिवर्जितम् ।

निरस्तचिबुकेनैव कर्णाभ्यां चैव वेष्टयेत्॥ २४७॥

पुच्छं वै वामकर्णे तु वेष्टयेत्तु प्रदक्षिणम् ।

वेष्टयेत्कमेवं तु शेषं शिरसि वेष्टयेत्॥ २४८॥

उष्णीषलक्षणं प्रोक्तं वस्त्रलक्षणमुच्यते ।

यजने स्थापने चाग्निकार्ये शैवोत्सवे तथा॥ २४९॥

उत्तमं दशहस्तं स्यान्मध्यमं नवहस्तकम् ।

अधमं चाष्टहस्तं स्यात् पञ्चतालसुविस्तृतम्॥ २५०॥

एवं वस्त्रद्वयं प्रोक्तं आचार्यौ धारयेत्क्रमात् ।

पीतं क्षौमं च रक्तंस्यात् अलाभेऽन्यत्परिग्रहेत्॥ २५१ ॥

अग्निदग्धं सकेशं च मूषिकैर्दूषितं तथा ।

पुरातनं च जीर्णं च वस्त्रं पञ्चविवर्जयेत्॥ २५२ ॥

दग्धं तु राष्ट्रनाशाय मूषिकघ्नं भयाय च ।

रोमं च कर्तृनाशाय धननाशाय जीर्णकम्॥ २५३ ॥

पुरातनं च वस्त्रं च यजमानं विनाशयेत् ।

तस्मात्द्दोषं परित्यज्य दापयेन्नववस्त्रकम्॥ २५४ ॥

वस्त्रलक्षणमेवोक्तम् उत्तरीयमथोच्यते ।

बाणहस्तायतं वापि वेदहस्तायतं तु वा॥ २५५ ॥

द्विहस्तमात्रविस्तारं बन्धयित्वा द्विपुछकम् ।

यज्ञोपवीतवद्धार्यम् उत्तरीयं विशेषत:॥ २५६ ॥

दुकूलमुत्तमं प्रोक्तं  व(वृ?)क्षसूत्रं तु मध्यमम् ।

अधमं तन्तुना कार्यं त्रिविधायोगपट्टिका॥ २५७॥

त्रियङ्गुलं तु विस्तारं तन्मानमुपवीतकम् ।

दशांगुलसमं दैर्घ्यं पञ्चाङ्गुलसुविस्तरम्॥ २५८॥

दुकूलद्वयसंयुक्तं गोलकाकृतिवत्कृतम् ।

सितभस्म समायुक्तं आचार्याय प्रदापयेत्॥ २५९॥

हेमाङ्गुलीयकटकौ कटिसूत्रं च कुण्डलम् ।

हेमयज्ञोपवीतं च पञ्चाङ्गभूषणं स्मृतम्॥ २६०॥

पवित्रं पञ्चनिष्कं स्यात् कटकं द्वादशं भवेत् ।

निष्काष्टकटिसूत्रं च कुण्डलं दशनिष्ककम्॥ २६१॥

हेमयज्ञोपवीतं च पञ्चनिष्कं प्रकीर्तितम् ।

इत्येवं विधिवत् प्रोक्तं पश्चादावाहयेच्छिवम्॥ २६२॥

रात्रावावाहयेद्देवं स्थिरलग्नं विनाहनि ।

आदाय कुम्भे संयोज्य रात्रौ यजनहोमकौ ॥ २६३ ॥

सायंप्रातःक्रमेणैव कुर्याद्देशिकसत्तमः ।

गर्भगृहं ततो गत्वा स्थण्डिलं चतुरश्रकम् ॥ २६४ ॥

मध्ये तु शिवकुम्भःस्याद् वर्धनीं तस्य वामके ।

अष्टकुम्भान् समादाय परितःस्थापयेत्क्रमात् ॥ २६५ ॥

सकलीकरणं कृत्वा सङ्कल्पं च ततःपरम् ।

पुण्याहं वाचयेत् तत्र दर्भैःपुष्पैःपरिस्तरेत् ॥ २६६ ॥

लम्बकूर्चं तु सङ्गृह्य लिङ्गस्योपरि विन्यसेत् ।

आसनावरणादीनि कल्पयेत् पूर्ववद्गुरुः ॥ २६७ ॥

नालिकेरं च ताम्बूलं दापयेद्धूपदीपकम् ।

कुम्भे चलासनं कल्प्य शक्त्यन्तं त्वर्चयेत्क्रमात् ॥ २६८ ॥

आसनं मूर्तिं विन्यस्य दर्भनाडीं प्रकल्पयेत् ।

नैवेद्यं धूपदीपौ च न्यासं कृत्वा ततःपरम्॥ २६९॥

अध्वषट्कं च विन्यस्य अष्टत्रिंशत्कला न्यसेत् ।

विद्यादेहं समावाह्य घटे नेत्रं प्रकल्पयेत्॥ २७०॥

गुरूपदिष्टमार्गेण मन्त्रमुच्चारयेच्छनैः ।
सर्वावरणसंयुक्तं हृदयादिसमन्वितम्॥ २७१॥

लिङ्गस्थं देवमादाय कुम्भे संयोजयेत्क्रमात् ।

ताम्बूलं गुलखण्डं च कदलीफलमेव च॥ २७२॥

पाद्यमाचमनार्घ्यं च धूपदीपं च दापयेत् ।

पीठाच्छक्तिं समादाय वर्धन्यां च सुयोजयेत्॥ २७३॥

अनन्तादींश्च पूर्वादि तत्तत्कुम्भे सुयोजयेत् ।

गन्धपुष्पैःसमभ्यर्च्य नैवेद्यादि प्रदापयेत्॥ २७४॥

यात्राहोमं तदग्रे तु कुण्डेवा स्थण्डिलोपरि ।

पूवोक्तविधिना चैव होमं कुर्याद्विचक्षणः ॥ २७५ ॥

पुष्पेणादाय तन्मूर्तिं शिवकुम्भे सुयोजयेत् ।

यात्रादानं ततःपश्चाद् ग्रहप्रीतिं च कारयेत्॥ २७६ ॥

परिचारकमाहूय दीक्षितं विनयान्वितम् ।

वस्त्रेणाच्छाद्य शिरसा गन्धाद्यैःसंविभूष्य च ॥ २७७ ॥

वाहयित्वा ततःशम्भुकुम्भं क्षौमाद्यलङ्कृतम् ।

विद्येशकुम्भानादाय दीक्षितैःवाहयेत्क्रमात्॥ २७८ ॥

कुम्भमुद्धृत्य शिरसा अनन्ताद्यैस्समावृतम् ।

आचार्योऽस्त्रं समुच्चार्य कुशैश्च स्पर्शयेद्धटम्॥ २७९ ॥

स्वस्तिघोषसमायुक्तं दीपज्वालासमन्वितम् ।

छत्रचामरबृन्दैश्च सर्वातोद्यसमन्वितम्॥ २८० ॥

शालां गत्वाऽथ देवेशं वेदिकोपरि मध्यमे ।

पश्चिमाभिमुखं स्थाप्य सावधनेन बुद्धिमान्॥ २८१ ॥

देवस्य वामभागे तु वर्धनीं विन्यसेद्बुधः।

विद्येश्वरांश्च पूर्वादीन् प्रधानाभिमुखान्न्यसेत्॥ २८२ ॥

बन्धने तु प्रतिष्ठायाम् उत्सवेप्रोक्षणे तथा ।

पश्चिमद्वारमेवं तु शालानां च प्रकल्पयेत्॥ २८३ ॥

यस्यां दिशि भवेद् द्वारं प्राचीं तां परिकल्पयेत् ।

तत्र तत्पुरुषं वक्त्रम् ऊर्ध्वं चाभिमुखं भवेत्॥ २८४ ॥

यागेशं च शिवाग्निं च स्थापयेत्पश्चिमाननम् ।

नित्यद्वारस्य पूजां च वृषकुम्भं तु पश्चिमे॥ २८५ ॥

यद्वक्त्रं द्वारबन्धं तत्पुरुषं तदुभावयेत् ।

आचार्यः सकलीकृत्य स्थिरमासनमर्चयेत्॥ २८६ ॥

आसनाद्यादीनि सर्वाणि प्रागादिषु प्रकल्पयेत् ।

धूपदीपादिना पूज्य ततो भोगाङ्गमर्चयेत्॥ २८७॥

ईशानं नैर्ऋते देशे पश्चिमे पुरुषं तथा।

अघोरमुत्तरे न्यस्य वामं दक्षिण देशके॥ २८८॥

पूर्वदेशे तु सद्यं च अर्चयेद्देशिकोत्तमः।

हृदयं वायुदेशे तु शिरो वै नैर्ऋते यजेत्॥ २८९॥

शिखामीशानदिग्भागे कवचं पावके यजेत् ।

ईशानपश्चिमेऽस्त्रं स्यात् नयनं यक्षपूर्वके॥ २९०॥

एवमेव समभ्यर्च्य धूपदीपसमन्वितम् ।

द्वितीयावरणादीनि प्रागादिषुप्रकल्पयेत्॥ २९१॥

तोरणं द्वारकुम्भं च लोकपालघटानपि।

मङ्गलाष्टकसंयुक्तं दशास्त्रं पूर्वतो यजेत्। २९२॥

विद्येश्वरांश्च पूर्वादि तथा कुण्डानि होमयेत् ।

दिवा यागे च संप्राप्ते पुरतस्सूर्यमर्चयेत्॥ २९३ ॥

रात्रियागे च संप्राप्ते पुरतःसोममर्चयेत् ।

पश्चादिवाकरं पूज्य द्वारादि तदनन्तरम्॥ २९४ ॥

दिवावापिनिशीथिन्यां पूजारम्भःप्रशस्यते ।

होमारम्भोनिशीथिन्यां सद्योऽधिवासनादृते॥ २९५ ॥

प्रशस्यते ततोऽन्यत्र होमारम्भं दिवाचरेत् ।

शान्तिनन्दिमहाकालं बलारातिं च पूर्वके॥ २९६ ॥

इन्द्राग्न्योरन्तरे भानुं आग्नेयामग्निपूजनम् ।

विद्याभृङ्गिगणेशं च यमं याम्ये प्रपूजयेत्॥ २९७ ॥

नैर्ऋत्यां वास्तुब्रह्माणं निर्ऋतिं विष्णुमेव च ।

निवृत्तिं वृषभं स्कन्दं वरुणं पश्चिमेरमाम्॥ २९८ ॥

क्षेत्रेशं वायुविघ्नेशं वायव्यां दिशिपूजयेत् ।

प्रतिष्ठां गौरीचण्डेशं धनदं सौम्यदेशके॥ २९९॥

ऐशान्यां गुरुमीशानं ब्रह्माणं च प्रपूजयेत् ।

कुबेरेशानयोर्मध्ये अस्त्रमस्त्रेश्वरीं न्यसेत्॥ ३००॥

मण्टपाराधनं कुर्यात् पूर्वोक्तेनैव वर्त्मना ।

प्रार्थयेद्गुरुमीशानं शिवकुण्डान्तिकं व्रजेत्॥ ३०१॥

कुर्यादध्ययनं दिक्षु शैवमन्त्रान्विदिक्षु च ।

ऋग्वेदाध्ययनं पूर्वे यजुर्वेदं तु दक्षिणे॥ ३०२॥

उत्तरे सामवेदं तु पश्चिमेऽथर्वणं तथा ।

प्रासादमीशकोणे तु वह्निकोणे त्वघोरकम्॥ ३०३॥

मृत्युञ्जयं तु नैर्ऋत्यां वायव्यामस्त्रमेव च ।

एवमेव प्रकर्तव्यं विशेषम् अधुनोच्यते॥ ३०४॥

शिवसङ्कल्पमेवोक्तं ततो रुद्रस्यसूक्तकम् ।

कद्रुद्राय त्वमग्ने च पूर्वभागे जपेद्बुधः ॥ ३०५ ॥

श्रीसूक्तं पावमानं च पुरुषसूक्तं त्रियम्बकम् ।

शान्तिद्वयं जपेद्धीमान् दक्षिणे तु विशेषतः ॥ ३०६ ॥

कालसूक्तं शन्नवर्गं विष्णुसूक्तं च वारुणम् ।

पश्चिमे तु जपेद्धीमान् पवमानं हिरण्यकम् ॥ ३०७ ॥

देवव्रतं ज्येष्ठसाम तथैव पुरुषावृतम् ।

वामदेवं विरूपाक्षं चोत्तरेतु विशेषतः ॥ ३०८ ॥

अग्नौचोपनिषद्रौद्रं पुराणानि पठेत्क्रमात् ।

आगमाध्ययनं दिक्षु विदिक्षु च विशेषतः ॥ ३०९ ॥

भारतं रामगानं च गीतं माहात्म्यमीश्वरम् ।

आचार्यों मूर्तिपैःसार्धं ततो होमं समाचरेत् ॥ ३१० ॥

होमारम्भस्य पूर्वेतु स्रुक्स्रुवं चेन्धनं तुषम् ।

परिधींश्चैव दर्भांश्च समिदाज्य चरूंस्तथा॥ ३११ ॥

होमद्रव्याणि सर्वाणि गन्धपुष्पं च धूपकम् ।

दीपादि द्रव्यपात्राणि त्वरणिं च कमण्डलुम्॥ ३१२ ॥

वर्धनीमक्षतं दर्वीं संप्राप्तं होमसाधनम् ।

आहृत्य होमसंभारान्नवकुण्डान् प्रतिक्रमात्॥ ३१३ ॥

प्रधाने देशिकःप्रोक्तःत्वन्यकुण्डेषु मूर्तिपाः।

कुण्डसंस्कारपूर्वं तु शैवाग्निं साधयेत्ततः ॥ ३१४ ॥

असंस्कृतेषु कुण्डेषु हुतं भवति निष्फलम् ।

तस्मात्कुण्डस्य संस्कारं कुर्यान्मन्त्रेणदेशिकः ॥ ३१५ ॥

द्वितालमात्रमायामं कनिष्ठाङ्गुलिनाहकम् ।

अवक्राश्चाव्रणाश्चैव श्यामाःपरिधयःक्रमात्॥ ३१६ ॥

पूर्वाग्रौ चोत्तराग्रौ च पूर्वादिमेखलोपरि ।

त्रिंशद्दर्भसमायुक्तान् वितस्तिद्वयदीर्घिकान्॥ ३१७॥

वेणितान्वर्तितान् वापि विष्टरानार्द्रसंयुतान् ।

दक्षिणावर्तितग्रन्थीन् विन्यसेन्मध्यमेखले॥ ३१८॥

षड्विंशाङ्गुलमायामं ग्रन्थिं पक्षाङ्गुलान्वितम् ।

अग्रं वेदाङ्गुलं  प्रोक्तं दर्भैःषोडशभिर्युतम्॥ ३१९॥

परिस्तरणमेवं स्यान् मेखलायां क्षिपेद्गुरुः।

मुष्टिमात्रं क्षिपेल्लाजं मेखलोर्ध्वे चतुर्दिशि॥ ३२०॥

विकिरैर्लाजपुष्पैश्च कुण्डशेषमशेषकम् ।

ब्रह्माणमच्युतं रुद्रम् अनन्तं परिधौयजेत्॥ ३२१॥

विष्टरेषु च लोकेशान् वज्रादींस्तरणे न्यसेत् ।

एवमेव प्रकारेण पूजयेद्देशिकोत्तमः॥ ३२२॥

प्रधानकुण्डे प्रथमं शिवाग्नेश्च समुद्भवः।

आचार्यो विधिना कृत्वा तत्तत्कुण्डेषु तं क्षिपेत्॥ ३२३॥

तत्र तत्रासनं कल्प्यतत्तन्मूर्तीःप्रकल्पयेत्।

तत्तत्कुण्डस्थ वह्नीनां नाम वच्मि यथाक्रमम्॥ ३२४॥

प्रधाने शिववन्हिस्स्यात् ततःप्रागादिकुण्डके ।

पूर्वे त्वाहवनीयं स्याद् वृद्धाग्निरग्निदेशके॥ ३२५॥

दक्षिणे दक्षिणाग्निःस्यान्नैर्ऋत्यां यौवनानलः।

पश्चिमे गार्हपत्याग्निःबालाग्निर्वायुकोणके॥ ३२६॥

केवलाग्निस्तूत्तरस्यां सामान्यमीशकोणके ।

इतिनाम्ना नामकृत्वा तत्तद्ध्यानं समाचरेत्॥ ३२७॥

पञ्चवक्त्रयुतं रक्तं सप्तजिह्वाविराजितम् ।

दशहस्तं त्रिणेत्रं च सर्वाभरणभूषितम्॥ ३२८॥

रक्तवस्त्रपरीधानं पङ्कजोपरि संस्थितम् ।

बद्धपद्मासनासीनं मेखलात्रयपादयुक्॥ ३२९ ॥

शूलं वज्रं च खड्गं च शक्तिं च सृणि दक्षिणे ।

गदादण्डौ च पाशं च पद्मं चक्रं च वामके॥ ३३० ॥

ऊर्ध्ववक्त्रे त्रिस्त्रजिह्वाःशेषाःप्रागादिषु क्रमात् ।

स्वाहादेवी स्वधापत्नी दक्षिणं वाममुच्यते॥ ३३१ ॥

शैवाग्निध्यानमुद्दिष्टं शिवकुण्डे प्रकीर्तितम् ।

एकवक्त्रं त्रिणेत्रं च त्रिमेखलं त्रिपादकम्॥ ३३२ ॥

अक्षमालां त्रिशूलं च स्त्रुचं च दक्षिणे करे ।

अङ्कुशं डमरुं चैव स्त्रुवं च वामहस्तके॥ ३३३ ॥

रक्तवर्णं सुखासीनं पीतवस्त्रेण वेष्टितम् ।

ध्यायेदाहवनीयाग्निं पूर्वस्यां कुण्डमध्यमे॥ ३३४ ॥

चतुर्भुजं त्रिणेत्रं च एकवक्त्रंजटाधरम् ।

त्रिशूलं परशुं चैव त्वभयं वरदान्वितम्॥ ३३५॥

श्वेताभं वृषभारूढं वृद्धाग्निं पावके यजेत् ।

द्विमुखं स्वर्णवर्णाभं त्रिपादं सप्तहस्तकम्॥ ३३६ ॥

हिरण्यादि चतस्त्रश्च जिह्वा दक्षिणवक्त्रके ।

सुप्रभादि त्रयाजिह्वा वामवक्त्रे च संस्थिताः॥ ३३७॥

शक्तिरग्निःस्त्रुवं चैव स्त्रुक् सव्ये घृतपात्रकम् ।

तोमरं परशुं वामे त्वजवाहनसंयुतम्॥ ३३८॥

दक्षिणाग्निमिति ध्यात्वा न्यसेद्दक्षिणकुण्डके।

त्रिणेत्रं पञ्चवदनं रक्ताङ्गं दशहस्तकम्॥ ३३९॥

शूलं परशुखड्गं च अभयंवज्रञ्चदक्षिणे।

टङ्कं पाशाब्ज चक्राणि वरदं चैव वामके॥ ३४०॥

हिरण्यकनके सव्ये ईशे द्वे शेषमेककम् ।

यौवनाग्निं वृषारूढं नैर्ऋत्यां विन्यसेद्बुधः ॥ ३४१ ॥

रक्ताङ्गं रक्तवस्त्राढ्यं वरदाभयसंयुतम् ।

स्रुक्स्रुवौ चोर्ध्वहस्तौ तु मुक्ताभरणभूषितम् ॥ ३४२ ॥

सप्तजिह्वासमायुक्तम् एकवक्रं जटाधरम् ।

अश्वारूढं गार्हपत्यं ध्यायेत् पश्चिमकुण्डके ॥ ३४३ ॥

द्विमुखं चैकहृदयं चतुःश्रोत्रंद्विनासिकम् ।

चतुः शृङ्गं वृषारूढं बालादित्यसमप्रभम् ॥ ३४४ ॥

स्रुक्स्रुवौ चाक्षमालां च शक्तिदक्षिणपार्श्वके ।

तोमरं व्यजनं चैव घृतपात्रं तु वामके ॥ ३४५ ॥

बालाग्निरूपमेवं तु विन्यसेद् वायुकुण्डके ।

द्विनेत्रं द्विभुजं चैव वरदाभयसंयुतम् ॥ ३४६ ॥

शुक्लवस्त्रसमायुक्तं श्वेतरक्तसमन्वितम् ।

सर्वालङ्कारसंयुक्तं पङ्कजासनसंस्थितम्॥ ३४७॥

केवलाग्निम् इतिध्यात्वा कुण्डमध्ये तु चोत्तरे ।

द्विमुखं वेदशृङ्गं च ह्यभयं शक्ति स्रुक्स्रुवौ॥ ३४८॥

वरदं खेटमनलं वहन्तं सव्यवामके।

सामान्याग्नि स्वरूपं तु विन्यसेदीशकुण्डके॥ ३४९॥

पूर्वोक्तेनैव मार्गेण तत्तत्कुण्डेषुदेशिकः।

ध्यात्वा वह्निं प्रधाने तु यजेच्छम्भुमनन्यधीः॥ ३५०॥

प्रधाने चासनं कल्प्य मूर्तिध्यानं च विन्यसेत् ।

पञ्चवक्त्रं दशभुजं गोक्षीरधवलप्रभम्॥ ३५१॥

सर्वसिद्धिप्रदं ध्यात्वा आसीनं पश्चिमाननम् ।

शिवाग्नौ शिवमावाह्य नित्यवत्पूजयेच्छिवम्॥ ३५२॥

पञ्चावरणसंयुक्तं पाद्यादिदीपसंयुतम् ।

एवं संपूजयेत्पूर्वं क्ष्मामूर्तिं पूर्वतो यजेत्॥ ३५३ ॥

क्ष्मावन्हि यजमानार्क जलवायु निशाकराः।

व्योमान्तमूर्तयश्चाष्टौ कुण्डानां मूर्तिधारकाः ॥ ३५४ ॥

भवश्चोग्रश्च शर्वश्च महादेवश्च रुद्रकः।

भीमःपशुपतिश्चैव ईशानश्चाष्टमूर्तयः ॥ ३५५ ॥

भवश्च पूर्वदिक्कुण्डे त्वाग्नेय्यामुग्र एव च।

शर्वश्च दक्षिणे कुण्डे महादेवस्तु नैर्ऋते॥ ३५६ ॥

रुद्राश्च पश्चिमे कुण्डे भीमो वै वायुकुण्डके।

पशुपतिश्चोत्तरे कुण्डे ऐशान्यामीश एव च॥ ३५७॥

त्रिणेत्राश्चतुर्भुजाश्चैव जटामकुटधारिणः।

सर्वाभरणसंपूर्णाःकुण्डानां मूर्तयःस्मृताः ॥ ३५८॥

इत्थं च मूर्तिपाःप्रोक्ताःमूर्तीशानधुनोच्यते।

पुरुषादीन् दिक्षु कुण्डे विदिक्षु हृदयादिकान्॥ ३५९॥

ईशानं नेत्रम् अस्त्रं च मूलं चैव प्रधानके ।

ईशानं स्फटिकाभासं शिवकुण्डे यजेद्बुधः॥ ३६०॥

पुरुषं पूर्वके कुण्डे पीतवर्णसमद्युतिम्।

अघोरं अञ्जनाभासं ध्यायेद्दक्षिणकुण्डके॥ ३६१॥

सौम्यकुण्डे यजेद्वामं रक्तवर्णसमन्वितम्।

सद्यं पश्चिमकुण्डे तु श्वेतवर्णसमन्वितम्॥ ३६२॥

हृदिवह्नेःइमे ध्येयाःत्रिणेत्राश्च चतुर्भुजाः।

वरदाभयसंयुक्ताः टङ्कशूलसमन्विताः॥ ३६३॥

सर्वाभरणसंपूर्णाः श्वेतवस्त्रानुधारिणः।

हृदयं श्वेतवर्णाभम् अग्निकुण्डे यजेच्छुभम्॥ ३६४॥

ईशकुण्डे न्यसेद्विद्वान् पीताभं च शिरोच्यते ।

शिखां नैर्ऋतिदिग्भागे श्यामवर्णसमद्युतिम्॥ ३६५॥

कवचं धूम्रवर्णाभं वायुकुण्डे न्यसेद्बुधः।

नेत्रं च श्यामालाकारम् अस्त्रं च कृष्णसन्निभम्॥ ३६६॥

द्वयं च शिवकुण्डे तु विन्यसेद्देशिकोत्तमः।

हृदयाद्यस्त्रपर्यन्ताःत्रिणेत्राश्च चतुर्भुजाः॥ ३६७॥

पाशशूलवराभीतिपीताम्बरधरा इमे।

सदाशिवस्वरूपाश्च ज्ञातव्याःशैवपारगैः॥ ३६८॥

तत्तत्कुण्डे इमे न्यस्याःतद्बाह्ये वसवस्तथा।

तद्बाह्ये मरुतश्चैव लोकपालाश्च तद्बहिः॥ ३६९॥

लोकपालैर्विना चेत्तु मध्यमोहोम ईरितः।

मरुद्भिर्वसुभिर्हीनः सुरहीनश्च कन्यसः॥ ३७०॥

कुण्डाधिदेवतान्सर्वान् कुण्डमध्ये न्यसेद्गुरुः।

पाद्यादिदीपपर्यन्तं अर्चयेद्विधिना ततः॥ ३७१॥

हस्तैकमानकुण्डे तु जुहुयात्सर्पिषागुरुः।

सहस्रावधिसंख्याकं न न्यूनं नाधिकं हुनेत्॥ ३७२॥

प्रतिकालं हुनेदित्थं दशाशं सर्पिषा क्रमात्।

पलाशचरुलाजैश्च होमं कुर्यात्प्रधानके॥ ३७३॥

अन्यानिसमिदादीनि पञ्चविंशतिसंख्यया।

शिवकुण्डे हुनेदेवं ऋत्विक्कुण्डेष्वतःपरम्॥ ३७४॥

पूर्वादीशानकुण्डान्तं यजेद्ब्रह्मषडङ्गकान्।

प्रधाने तु घृतं हुत्वा पञ्चाशद् द्विशताधिकम्॥ ३७५॥

तदर्धं समिधा हुत्वा चरुं तत्संख्यया तथा।

तत्तत्कुण्डोक्तद्रव्येण हुत्वा पूर्वोक्तसंख्यया॥ ३७६॥

अन्यद्रव्याणि सर्वाणि यथालाभं हुनेद्गुरुः।

कपिलाया घृतं श्रेष्ठं मिश्रयोन्यश्च मध्यमम्॥ ३७७॥

मेषाज्यं कन्यसं प्रोक्तं माहिषं वर्जयेद्धृतम्।

सहस्रं वा त्रिपादं वा सहस्रार्धमथापि वा॥ ३७८॥

उत्तमादिक्रमेणैव प्रधाने होमयेद्गुरुः।

दिग्विदिक्षु च कुण्डेषु पञ्चब्रह्मषडङ्गकान्॥ ३७९॥

प्रधानहोमसंख्याया ह्यर्धार्धं होममाचरेत्।

प्रोक्तेतरादि देवानां होममावरणात्मनाम्॥ ३८०॥

प्रधानकुण्डे ज्ञेयं हि शतांशं होमसंख्यया।

चतुःखारी च भारंचखारीद्वौ संग्रहेदधृतम्॥ ३८१॥

प्रतिकालं हुनेद्विद्वान् उत्तमादिक्रमेण तु।

द्विपर्वग्राहितर्जन्यां बिन्दुरित्यभिधीयते॥ ३८२॥

बिन्दुषङ्कञ्च कर्षार्धं तद्वयं कर्षकं भवेत् ।

कर्षद्वयं तु मुष्टिःस्यात् तद्वयं प्रसृतिर्भवेत्॥ ३८३॥

तद्वयंकुडुपं प्रोक्तं तद्वयं धारणं भवेत्।

धारणद्वितयं प्रस्थं द्वात्रिंशाहुति प्रस्थकम्॥ ३८४॥

कर्षपूर्णधृतेनैव एकाहुतिमथाचरेत्।

गुञ्जाया वाथ माषस्य विंशतिर्धारणाःस्मृताः॥ ३८५॥

धारणाष्टौ पलं वाथ मुष्टिर्वाथ भवेदिह।

उक्तान्यन्तरचातुष्कं कुडुपं परिचक्षते॥ ३८६॥

प्रस्थं तु तच्चतुष्कं स्यात् तच्चतुष्कं तु चाढकम्।

नवधान्यादि कान्सर्वान् आढकेन पृथक्पृथक्॥ ३८७॥

द्विप्रस्थं सर्षपं प्रोक्तं तिलमञ्जलिमात्रकम्।

एवमेव प्रमाणेन प्रतिकालं हुनेत्क्रमात्॥ ३८८॥

घृतं तु व्याहृतिःप्रोक्तं पञ्चपक्षमथोच्यते।

पूर्वेत्वाहवनीयाग्निःदक्षिणाग्निस्तुदक्षिणे॥ ३८९॥

पश्चिमे गार्हपत्याग्निःकेवलग्निस्तु चोत्तरे।

ईशाने तु शिवाग्निस्तु पञ्चाग्निरिति कीर्तितः॥ ३९०॥

प्रधाने व्योममूर्तिःस्याद् वायुमूर्तिश्च पूर्वके।

दक्षिणे चाग्निमूर्तिःस्याज्जलमूर्तिश्च सौम्यके॥ ३९१॥

क्ष्मामूर्तिःपश्चिमे कुण्डे कुण्डानां मूर्तिधारकाः।

ततो मूर्तीश्वरान् वच्मि प्रधानात्पश्चिमान्तकम्॥ ३९२॥

पञ्चपक्षे च मूर्तीनां रूपध्यानमथोच्यते।

ईशेसदाशिवःप्रोक्तःरूपध्यानं च पूर्ववत्॥ ३९३॥

पञ्चावरणमार्गेण पूजयेद्देशिकोत्तमः।

पूर्वकुण्डे त्रिणयनम् एकवक्त्रं स्मिताननम्॥ ३९४॥

व्याघ्रचर्मपरीधानं नागयज्ञोपवीतिनम्।

शुद्धस्फटिकसङ्काशं चन्द्रर्धकृतशेखरम्॥ ३९५॥

अक्षमालांत्रिशूलं च खड्गाभीतिं च सव्यके।

बाणं कमण्डलुं चाब्जं वरं वामे दधानकम्॥ ३९६॥

इत्थं ध्यात्वेश्वरं विद्वान्सर्वाभरणभूषितम्।

रुद्रंदक्षिणकुण्डे तु भस्मोधूलितविग्रहम्॥ ३९७॥

चतुर्भुजं त्रिनेत्रं च जटामकुटमण्डितम्।

माणिक्कानेकवर्णाभं पीतवस्त्रेणवेष्टितम्॥ ३९८॥

सव्ये व्याख्यानमनलं वामे पुस्तकशूलधृक्।

ध्यायेदुत्तरकुण्डे तु विष्णुं वै नीलसन्निभम्॥ ३९९॥

एकवक्त्रं द्विनयनं किरीटमकुटो ज्ज्वलम्।

पीताम्बरधरं शङ्खगदाचक्राब्जधारिणम्॥ ४००॥

सर्वलक्षणसम्युक्तं मुक्ताभरणभूषितम् ।

ब्रह्माणं पश्चिमे कुण्डे मौञ्जीदर्भैरलङ्कृतम्॥ ४०१ ॥

चतुर्भुजं चतुर्वक्त्रं प्रतिवक्त्रं द्विलोचनम् ।

पीतवर्णं सुवदनं चित्रवस्त्रसमन्वितम्॥ ४०२ ॥

सर्वावयवसंपूर्णं स्त्रुग्दण्डाक्षकमण्डलुम्।

एवंमूर्तीश्वराःप्रोक्ता:मन्त्रं चैवाधुनोच्यते॥ ४०३ ॥

पूर्वे पुरुषहृत्प्रोक्तं याम्ये घोरं शिरस्तथा ।

पाशौसद्यश्चकवचं सौम्येवामं शिखा तथा॥ ४०४ ॥

नेत्रास्त्रेशानदेवाःस्युःअर्च्याःप्राधान्यकुण्डके।

पूर्वादि कुण्डे द्वौ देवौ वर्णध्यानं च पूर्ववत्॥ ४०५ ॥

ततत्कुण्डे समावाह्य तत्तन्मन्त्रेण होमयेत् ।

एवं पञ्चविधं प्रोक्तं शेषं पूर्ववदाचरेत्॥ ४०६ ॥

कल्पयेदेककुण्डं चेत् यथा वित्तानुसारतः।

होमं कुर्याद्यथोक्तेन ब्रह्माङ्गानां दशांशकम्॥ ४०७॥

इत्येवं त्रिविधं प्रोक्तं समिद्द्रव्यमिहोच्यते।

वारुणे शानपर्यन्तं जिह्वास्थानं प्रकीर्तितम्॥ ४०८॥

हिरण्यायां समिद्धोमं मधुदुग्धं तथैव च।

कनकायां घृतं प्रोक्तं दधि चैव तु शर्करा॥ ४०९॥

रक्तायां तु चरुं हुत्वा फलापूपं तथैव च।

लाजं हुत्वा तु कृष्णायां नीवारं चणकं तथा॥ ४१०॥

सुप्रभायां हुनेत् सक्तु निष्पावम् आढकं तथा।

यवं हुत्वातिरक्तायां वेणुं वै मुद्गमेव च॥ ४११॥

बहुरूपे तिलं माषं सिद्धार्थं गोधुमं तथा।

द्रव्याण्यन्यानि सर्वाणि कनकायां हुनेत्क्रमात्॥ ४१२॥

कर्षपूर्णेन सर्पिस्तु समिधो द्वादशाङ्गुलाः।

कांस्यमृत्ताम्रजां स्थालीं संग्रहेद्विधिमानतः॥४१३॥

प्रस्थाष्टतण्डुलं ग्राह्य देशिकस्तु पचेच्चरुम्।

विधिपक्कं तदन्यद्वा ग्रासमात्रेण संहुनेत्॥४१४॥

विधिपक्कचरुं होमं कुर्यात् संपातसंस्कृतिः।

इन्धनानि क्षिपेदग्नौ कुब्जहस्तेनलाजकम्॥४१५॥

पृथुकं धानकं सक्तु मुष्टिमात्रेण होमयेत्।

गोधूमं वैणवं चैव नीवारं शुक्तिमात्रतः॥४१६॥

निष्पावं नवभिःप्रोक्तं चणकं दशसङ्ख्यकम्।

पञ्चाङ्गुल्याहुनेद्धीमान् आढकं राजमाषकम्॥४१७॥

कुळुत्थं माषमुद्गं च प्रियङ्गु श्यामकं तथा।

शुक्तिमात्राहुतिं हुत्वा शुक्त्यर्धं यवसर्षपम्॥४१८॥

हुत्वा तिलं तु मृग्यादि द्रव्यान्ते व्याहृतिं हुनेत्।

पञ्चाशच्च तदर्धं वा आढकादीन् पृथक् पृथक्॥ ४१९॥

तत्तद्द्रव्योक्तमानेन तण्डुलं च क्रमात्पचेत्।

अग्नौ द्रव्यं हुनेद्धीमान् शुद्धान्नं मुद्गमन्नकम्॥ ४२०॥

क्षीरान्नं कृसरान्नं च गुलान्नं चाक्षमात्रकम्।

स्वप्रमाणान्यपूपानि चतुःकृत्वाथवाहुनेत्॥ ४२१॥

पयोदधिमधुक्षीरं क्रूरेक्षुजन्मवस्तुनि।

स्रुव पूर्णाहुतिं हुत्वा पुन्नगफलवद्गुलम्॥ ४२२॥

इक्षुपर्वविशालेन कदल्यर्धेन होमयेत्।

हुत्वा चूतं स्वप्रमाणं भित्वाष्टौ नालिकेरकम्॥ ४२३॥

लिकुचं स्वप्रमाणेन नारङ्गं त्वग्विसृज्य च।

त्रिंशदं शेनभागेन भित्वा तु पनसंहुनेत्॥ ४२४॥

कवलं सूरणं बलं पद्मकन्दं च नीलकम् ।

विभीतिफलमात्रेण कन्दं भित्वा तु होमयेत्॥ ४२५॥

चन्दनं चणमात्रेण ततो मृगमदद्वयम्।

चन्द्रकुङ्कुमकाश्मीरकस्तूरी कृष्णगन्धकान्॥ ४२६॥

माषवद्गुग्गुलं धूपं बदरीफलवद्धुनेत्।

उशीरं जलपिङ्गञ्च मरुद्दमनतालकम्॥ ४२७॥

द्व्यङ्गुलं लतानां च श्रीपत्रं च सुपुष्पकम्।

जातीफलं च ताम्बूलं एलालवङ्गसंयुतम्॥ ४२८॥

करेणजुहुयाद्द्रव्यं स्रुवपूर्णेनव्याहृती:।

स्रुचावटेन संपूर्णं पूर्णाहुतिमथाचरेत्॥ ४२९॥

पलाशं सद्यमन्त्रेण मूलेनाज्यं तु होमयेत्।

अघोरेण चरुं हुत्वा लाजं तत्पुरुषेण तु॥ ४३०॥

सक्तु च वाममन्त्रेण त्वीशेन धान्यकं हुनेत् ।

समिद्द्रव्याणि सर्वाणि पूर्वं हुत्वा प्रधानके॥ ४३१ ॥

पश्चात् पूर्वादिकुण्डेषु होमशेषं ततो हुनेत् ।

हुत्वा त्वीशे तु निष्पावम् अपामार्गं प्रधानके॥ ४३२॥

पूर्वेऽश्वत्यं च गोधूमं याम्ये तिलमुदुम्बरम् ।

आढकं च वटं सौम्ये प्लक्षं मुद्गं च पश्चिमे॥ ४३३ ॥

शमीसर्षपम् अग्नौ तु ऐशान्याम् अर्कमाषकौ ।

स्वादिरं शालिनैर्ऋत्यां वायव्यांक्षणबिल्वकम्॥ ४३४॥

नेत्रस्यआम्रं च नीवारं शिवकुण्डे हुनेद्बुधः।

अस्त्रस्य वैणवं दूर्वा तथा च शिवकुण्डके॥ ४३५॥

दिग्विदिक्षु च कुण्डेषु तत्तन्मन्त्रेण होमयेत् ।

समिदाज्यचरून्लाजान्दिग्द्रव्य ञ्चसमानकम्॥ ४३६ ॥

अन्यद्रव्याणि सर्वाणि न्यूने वाप्यधिकेऽपि वा ।

यथासंभवमानेन होमयेद्देशिकोत्तमः॥ ४३७॥

ईशाने यवधान्यं च मूलेन राजमाषकम्।

शिखायां श्यामकं हुत्वा प्रियङ्गुञ्च कुलुत्थकम्॥ ४३८॥

अघोरेण तु पञ्चान्नम् अपूपं शिरसा हुनेत्।

नेत्रेण पायसं हुत्वा दुग्धमीशेन होमयेत्॥ ४३९॥

दधि तत्पुरुषेणैव मधु च वाममन्त्रतः।

गुलं चाघोरमन्त्रेण मूलेनैवेक्षुदण्डकम्॥ ४४०॥

ईशानेन फलादीनि कन्दादि मूलमन्त्रतः।

मूलेन चन्दनं चैव कस्तूरी कृष्णगन्धकम्॥ ४४१॥

गोरोचना च काश्मीरं कुङ्कुमं मृगनाभिकम्।

हिमतोयं च कर्पूरं सर्वं च जुहुयात्क्रमात्॥ ४४२॥

बीजमुख्यैश्च श्रीबेरं उशीरं मरुगुग्गुळुम्।

दशाक्षरेण पुष्पाणि बिल्वं पाशुपतेन च॥ ४४३ ॥

अघोरेण तु ताम्बूलं वासनाद्रव्यसंयुतम्।

अन्यानि होमयोग्यानि मूलेनैव तु होमयेत्॥ ४४४ ॥

द्रव्यं प्रतिविशेषेण व्याहृतिं च पुनःपुनः।

पूर्वादि वायुकुण्डान्तं होमकर्म समाप्यच॥ ४४५ ॥

पूर्णाहुतिं ततःकृत्वा व्याहृत्या च हुनेत्क्रमात्।

धूपदीपौ ददेत्पश्चात्तदन्तेमेखलात्रये॥ ४४६ ॥

तत्तत्स्वनाममन्त्रेण लोकेशादिबलिं क्षिपेत्।

कुण्डपार्श्वेषु सर्वेषु सदक्षे बलिमाचरेत्॥ ४४७ ॥

पूरुषादिवायुकुण्डान्तं अन्तर्बाह्येबलिंक्षिपेत्।

नाडीसन्धानमार्गेण तत्तत्कुण्डाधिदेवताः॥ ४४८ ॥

कुशाक्षतेनपुष्पेण संग्राह्य देशिकोत्तमः।

शिवकुण्डगताग्निस्थं शिवे संयोजयेत्ततः॥४४९॥

सर्वातोद्यसमायुक्तं वेदघोषसमन्वितम्।

महापूर्णाहुतिं हुत्वा व्याहृत्या जुहुयात्ततः॥४५०॥

प्रदर्श्य धूपदीपादीन् अन्तर्बाह्यबलिं ददेत्।

श्रोत्राभिवदनं कृत्वा मां रक्षेति वदेत्त्वया॥४५१॥

सकलीकरणं कृत्वा जपं कृत्वा समर्पयेत्।

तत्तत्कुण्डगताग्निं च तत्तत्कुण्डे तु रक्षयेत्॥४५२॥

अर्थवाग्निं च संग्राह्य शिवकुण्डे नियोजयेत्।

उत्थाने त्वासनाक्रोधे क्षुते निष्ठीवने क्रमात्॥४५३॥

वायुचारे भयोत्पन्ने भाषणेचाप्यदीक्षितैः।

श्लोष्मोद्गारे च सन्तापे क्रियाविस्मृतिसंभवे॥४५४॥

मन्त्रोक्तमन्त्रकार्येषु व्याहृत्या ऽऽहुतिमाचरेत्।

ततःकुम्भान्तिकं गत्वा वेद्यादक्षिणभागतः ॥४५५॥

पुष्पाञ्जल्या पूजयित्वा तत्वत्रितयमन्त्रतः।

धूपदीपौ ददेत्पश्चान्महानैवेद्यमाचरेत्॥४५६॥

चतुर्हस्तं तथा पात्रं चतुष्पात्रं तु प्रस्थकम्।

आढकं तच्चतुष्कं स्याद् द्रोणं तस्य चतुष्ककम्॥४५७॥

द्विद्रोणमष्टद्रोणं च नित्यमेव विधीयते।

नैमित्यमष्टद्रोणं तु भारंद्वादशान्तकम्॥४५८॥

प्रस्थितं यैस्तु संख्याभिःतैस्संख्याभिस्तु काम्यकम्।

एवं क्रमेण नैवेद्यं दापयेद्देशिकोत्तमः॥४५९॥

हविश्च षड्विधं ज्ञियं पायसं शुद्धमन्नकम्।

गुळान्नं कृसरान्नं च दध्यन्नं मुद्गमन्नकम्॥४६०॥

प्रतिद्रव्येण संयुक्तम् आढ्कद्वयतण्डलैः।

अनेकव्यञ्जनैर्युक्तम् अपूपादि समन्वितम्॥ ४६१॥

व्रीहिरेकपलं चैव शालिर्दशगुणं भवेत्।

प्रियङ्गुशतसंप्रोक्तं नीवारं तु सहस्रकम्॥ ४६२॥

गोधूमं तु भवेल्लक्षम् अनन्तं वैणवंभवेत्।

भक्ष्यं भोज्यं च पेयं चलोह्यं शोष्यं च पञ्चधा॥ ४६३॥

नानाफलैश्च संयुक्तम् अपूपैश्च समन्वितम्।

स्थालिकां क्षालनं कृत्वा नैवेद्यं च प्रपूरयेत्॥ ४६४॥

व्यञ्जनैरावृतं चैव पूरयेदन्नकोपरि।

पिधाय शुद्धवस्त्रैश्च पाचकोपरिधारयेत्॥ ४६५॥

वाद्यघोषसमायुक्तं यागशालांप्रवेशयेत्।

शिवाग्रे स्थापयित्वा तु अम्बुना प्रोक्ष्येत्ततः॥ ४६६॥

देवस्यात्वेति मन्त्रेण नैवेद्यं दापयेत्ततः।

धूपादिव्यञ्जनान्तं तु उपचारान् समाचरेत्॥४६७॥

मन्त्रपुष्पादिनाभ्यर्च्य भस्म दद्याच्च देशिकः ।

त्रिकालं चान्नलिङ्गं च नित्योत्सवादि कर्म च ॥४६८ ॥

नित्यहोमादि कर्मं च यागालय निवेशनम् ।

सर्वं नित्योत्सवं कुर्यात् शिवयागस्य मण्टपे ॥४६९ ॥

तीर्थं नैमित्तिकं चैव शिवयागे विवर्जयेत् ।

अङ्कुराद्यभिषेकान्तं मध्याह्ने भोजयेद्विजाम् ॥४७०॥

सहस्राद्ययुतपर्यन्तं यथावित्तानुसारतः ।

सर्वदोषनिवृत्यर्थं कुर्याद्ब्राह्मणभोजनम् ॥४७१ ॥

भक्तितःसप्तरात्रं वा पञ्चरात्रं त्रिरात्रकम् ।

एकरात्रमथो सद्यः कुर्याद्देवाधिवासनम् ॥४७२ ॥

होतव्यं प्रत्यहं स्वस्वमन्त्रेनैव यजेच्छिवम् ।

एवमेवविधानेन सायंप्रातर्दिने दिने ॥४७३॥

एत्येवं पूजयेद्रात्रौ प्रभाते विमले सति ।

स्नात्वा गुरुर्विधानेन नित्यकर्म समापयेत् ॥४७४॥

यागशालां प्रविश्याथ ऋत्विग्भिः परिवारकैः।

विघ्नराजं च सम्पूज्य सङ्कल्पं च ततः परम् ॥४७५ ॥

पुण्याहं पञ्चगव्यं च कुम्भं सम्स्थापयेद्गुरुः ।

सकलीकरणं कृत्वा भूतशुद्ध्यादिकं चरेत् ॥४७६ ॥

द्वारादि गुरुपूजान्तं पूर्ववत् पूजयेत्क्रमात् ।

……………..शिवकुम्भादि स्थापयेद्गुरुः॥४७७॥

निर्माल्यं च विसृज्याथ कल्पयेत् स्थिरमासनम् ।

मूर्तिध्यानं च विन्यस्य मूलेनावाह्य देशिकः ॥४७८॥

पाद्यादि धूपदीपौ च ताम्बूलादि निवेदयेत् ।

दर्पणेवाऽथ कूर्चै वा कल्पच्चलमासनम् ॥४७९॥

तैलादि कुम्भपर्यन्तंह्यभिषेकं समर्प्य च ।

तन्मूर्तिं योजयेत्कुम्भे गन्धमाल्यैश्च धारयेत् ॥४८० ॥

मन्त्रोदनं च ताम्बूलं दापयेद्धूपदीपधृक् ।

होमं कुर्याद्विधानेन पश्चान्नैवेद्यमाचरेत् ॥४८१ ॥

पूर्वोक्तविधिमार्गेण उपचारान् समर्प्य च ।

पुण्याहमभिषेकं च द्वाराद्यर्चन होमकान् ॥४८२ ॥

द्विकालं कारयेदेवं अन्यकाले विधीयते ।

निर्माल्यं च विसृज्याथ नैवेद्यधूपदीपयुक् ॥४८३ ॥

अहन्यहनि संपूज्य निर्दिष्टदिवसावधि।

पश्चाद्गर्भगृहं प्राप्य सामान्ययजनं कुरु ॥४८४ ॥

अष्टबन्धनकाले तु नन्द्यावर्तविहीनके ।

स्थलकर्मणि विश्लिष्टे सुधाकर्मविहीनके ॥४८५॥

क्षणकाले गृहीत्वा तु पुनः सन्धानमाचरेत् ।

शान्तिकुम्भं समापाद्य पूजयेद्देशिकोत्तमः ॥४८६॥

निर्दिष्टदिवसात्पूर्वे सायं होमावसानके ।

मूललिङ्गान्तिकं गत्वा शोधयेद्देशिकोत्तमः ॥४८७ ॥

पीठांशं षोडशं कृत्वा चैकांशं नवरत्नकम् ।

दशांशं सैकतैर्युक्तं पञ्चांशं बन्धयेत् क्रमात् ॥४८८ ॥

त्रियङ्गुलप्रमाणेन स्वर्णेन चतुरश्रकम् ।

विलिख्य शिवबीजेन मध्ये रन्ध्रावटे क्षिपेत् ॥४८९॥

माणिक्यं मध्यमे न्यस्य शक्रे मरकतं न्यसेत् ।

इन्द्रनीलं तु याम्यायां स्फाटिकं वारुणे भवेत् ॥४९०॥

वज्रं तु सौम्यदिग्भागे वैडूर्यं वह्निगोचरे ।

मौक्तिकं नैर्ऋते देशे पद्मरागं तु मारुते ॥४९१ ॥

प्रवालमीशदेशे तु चतुस्संस्कारकान् न्यसेत् ।

मूलमन्त्रेण संपूज्य षडुत्थासनमर्चयेत् ॥४९२ ॥

मुकुलीं पद्ममुद्रां च शोधनीं च प्रदर्शयेत् ।

मध्यादीशानपर्यन्तं विन्यसेन्मूलमन्त्र तः ॥४९३ ॥

पूजयेत्सैकतं लिङ्गं पीठं चैव दृढीकृतम् ।

प्रासादस्याग्रकेयाम्ये पावके वान्यदेशके ॥४९४ ॥

गोमयेनोपलिप्याथ चतुरश्रद्वयं ततः ।

स्थण्डिलं तत्रकर्तव्यम् अष्टपत्रंसकर्णिकम् ॥४९५ ॥

नवपात्रसमायुक्तमथवा चैकपात्रकम् ।

पुण्याहं वाचयेत्तत्र सर्वद्रव्याणि प्रोक्षयेत् ॥४९६ ॥

द्विपञ्चदिवसस्थानभङ्गं चेच्छिवलिङ्गके ।

तत्तत्पूजादिकं सर्वं पूजयेत्तु शिवाध्वरे ॥४९७॥

मूललिङ्गे विशेषण शान्तिहोमसमन्वितम् ।

नैवेद्यं गन्धपुष्पं च धूपदीप समन्वितम् ॥४९८॥

अष्टद्रव्याणि सम्पूज्य अष्टविद्येश्वरान् क्रमात् ।

प्रथमं पञ्चमूर्तिञ्च द्वितीयं च त्रिमूर्तिनम् ॥४९९॥

एतन्मूलेनमन्त्रेण द्रव्यान्येवाभिमन्त्रयेत् ।

अर्चयित्वा यथोक्तेन कर्तव्यं स्थण्डिलान्तकम् ॥५०० ॥

उलूखलं च मुसलं प्रोक्षयेच्छुद्धवारिणा ।

षडुत्थासनमभ्यर्च्य तस्योपरिनिधापयेत् ॥५०१ ॥

लूखलं ब्रह्मदैवत्यं मुसलं विष्णुदैवतम् ।

वस्त्रदर्भैरलङ्कृत्य लूखलं मुसलस्य च ॥५०२ ॥

गन्धपुष्पादिनाभ्यर्च्य धूपदीपादिकं ददेत् ।

आहूय परिचारौ द्वौ सोष्णीषौ चोत्तरीयकौ ॥५०३॥

लूखलस्य तु तन्मध्ये तद्द्रव्यं निक्षिपेद्गुरुः ।

मुसलं च गृहीत्वाथ ताडयेत् सुदृढं पुनः ॥५०४॥

सम्यक् सुकुठ्य मुसलैः सुपक्वं वीक्ष्य बुद्धिमान् ।

पूजांशं षोडशं कृत्वा प्रायश्चित्तं हुनेत् क्रमात् ॥५०५॥

शिल्पिस्पर्शादिदोषाय स्थापयेच्छान्तिकुम्भकम् ।

प्रज्वाल्य शिववह्नौ तु शान्तिमन्त्रं शतं हुनेत् ॥५०६॥

दग्धमूले तु वल्मीके क्षेत्रे मृद्ग्राह्य कर्कटे ।

वृषश्रृङ्गे बिल्वमूले नदीमृद्गजदन्तिके ॥५०७॥

अष्टमृद्ग्राह्यते धीमान् भाण्डमध्ये निधापयेत् ।

अश्वत्थं आम्र जम्बू च वटं औदुम्बरं तथा ॥५०८॥

पञ्चत्वक् च समाख्यातं एकभाण्डे निधाय च ।

पलाशोदुम्बराश्वत्थजम्बून्यग्रोधपल्लवम् ॥५०९॥

पञ्चपल्लवमाख्यातं तत्पात्रे च निधापयेत् ।

बिल्व कपित्थ निर्गुण्डी सरली वारुणं तथा॥५१०॥

पञ्चबिल्वमितिख्यातं पात्रमध्ये विनिक्षिपेत् ।

विधिवत्पञ्चगव्यं च स्थापयेद्देशिकोत्तमः ॥५११॥

व्रीहिं तदग्रे निक्षिप्य तिल तण्डुल संयुतम् ।

तत्तत्कुम्भान् न्यसेद्धीमान् चूतपल्लवसम्युतम् ॥५१२॥

षडुत्थासनमभ्यर्च्य संहितां पूजयेत् क्रमात् ।

व्योमव्यापिजपेत्तत्र धूपदीपौददेद्गुरुः॥५१३ ॥

विनिक्षिपेत् तण्डुलं पात्रे कौतुकद्वयसंयुतम् ।

भस्मं सितं नालिकेरं ताम्बूलेन समन्वितम् ॥५१४॥

क्रमेण द्रव्यमभ्यर्च्य कौतुकेन सुविन्यसेत् ।

संपातं च हुनेद्विद्वान् वाद्यघोषसमन्वितम् ॥५१५ ॥

ब्रह्मघोष समायुक्तं शिवलिङ्गान्तिकं व्रजेत् ।

तैलाभ्यङ्गं ततोदेवे कुर्याद्धीमान् विशेषतः ॥५१६॥

पञ्चगव्येन संस्नाप्य लिङ्गपीठान्तरं क्रमात् ।

अष्टमृत्सलिलैश्चैव कषायैः शान्तिकुम्भकैः ॥५१७॥

पञ्चपल्लवबिल्वैश्च प्रत्येकमभिषेचयेत् ।

चन्दनाद्यैर्विलिप्याथ रक्षासूत्रं प्रबन्धयेत् ॥५१८॥

एवं रात्रौ प्रकर्तव्यं प्रभाते स्नानमाचरेत् ।

गर्भगेहं ततः प्राप्य पुण्याह प्रोक्षणं क्रमात् ॥५१९॥

व्यपोह्योषितपुष्पाणि कौतुकं वस्त्रसम्युतम् ।

अभिषेकं ततः कुर्यात् उपचारान् प्रकल्पयेत् ॥५२०॥

अध्वषट्कं च विन्यस्य ह्यष्टत्रिंशत्कला न्यसेत् ।

मन्त्रन्यासं ततः कृत्वा धूपदीपादिकैर्यजेत् ॥५२१॥

यागशालां पुनः प्राप्य ऋत्विग्भिः परिचारकैः ।

यागपूजाप्रकारेण शिवं साङ्गं प्रपूजयेत् ॥५२२॥

अग्निं प्रज्वाल्य सम्पूज्य होमं पूर्ववदाचरेत् ।

प्रायश्चित्तं पुराहुत्वा जयादिजुहुयात्ततः ॥५२३॥

भूरादिभ्यश्च शिरसा पूर्णां हुत्वा विधानतः ।

धूपदीपौ ददेत् पश्चादन्तर्बाह्यबलिं ददेत् ॥५२४॥

श्रोत्राभिवन्दनं कृत्वा वर्मणा परिधीं दहेत् ।

विष्टराणि समादाय मुक्त्वाग्रन्थिं विसर्जयेत् ॥५२५॥

दर्भास्तरणमानीय सर्पिषा सेचनं दहेत् ।

तद्भस्मं च गृहीत्वा तु धारयेत्तु ललाटके ॥५२६॥

सकलीकरणं कृत्वा जपैः पश्चात्समर्चयेत् ।

नाडीसन्धान मार्गेण कुण्डादेवं समाचरेत् ॥५२७॥

कुम्भे संयोजयेद्विद्वान् धूपदीपादि सम्युतम् ।

अग्निं विसर्जयेत् पश्चात् अस्त्रकुम्भं च वर्धनी ॥५२८॥

द्वारपालादि लोकेशां विसृजेत् सकलान्यपि ।

मुहूर्तै समनप्राप्ते यात्रादानं गुरोः करैः ॥५२९॥

दैवज्ञायग्रहप्रीतिदानं दद्याद्विशेषतः।

गोभूतिलहिरण्याज्य वासोधान्य गुलानि च ॥५३०॥

रौप्यं लवणमित्याहुः दशदानानि तानि वै ।

कन्यादानं चोपनयनं दानं भस्म तथैव च ॥५३१॥

रुद्राक्षं शिवलिङ्गं स्याद् दानान्यन्यानि दापयेत् ।

आचार्यं पूजयेत् पश्चात् वस्त्राभरणकुण्डलैः ॥५३२॥

शय्यां च वाहनं दासी रत्नानि विविधानि च ।

सस्यपूर्णां वसुमतीं सवत्सां गां पयस्विनी ॥५३३॥

एतानिगुरवेदद्यात् पश्चात् ताम्बूल दक्षिणाम् ।

त्रिंशंनिष्कं तु श्रेष्ठं स्याद् विंशन्निष्कं तु मध्यमम् ॥५३४॥

अधमं दशनिष्कं स्याद् आचार्यस्य तु दक्षिणाम् ।

आचार्यार्धं साधकाय तदर्धं वास्तुहोमिने ॥५३५॥

ऋत्विजां चैव सर्वेषां जनं प्रति पृथक् पृथक् ।

दद्याद् द्रव्यं तदर्धं च तत्समा शिल्पिदक्षिणा ॥५३६॥

तदर्धं अस्त्रजप्तृणां तत्समं वेदपाठिने ।

दैवज्ञाय समं दद्याद् तथा पौराणिकाय च ॥५३७॥

स्थानिनां परिचाराणां यथा श्रद्धानुसारिणा ।

गीतवाद्यकनृत्तानां दासीनां तु तथैव च ॥५३८॥

अन्येषां शिवभक्तानां प्रीतिं कुर्याद्विशेषतः ।

भूमिदानं विशेषेण क्रमेण कुरु ते गुरुः ॥५३९॥

आचार्यमानसन्तुष्टिःदेवसन्तोषकारणम् ।

आचार्यमनसःकोपःदेवताकोपमेव च ॥५४०॥

तस्मात् सर्वप्रयत्नेन ह्याचार्यान् तोषयेत्प्रभुः ।

समित्भारसहस्राणि घृतकुम्भदशानि च ॥५४१॥

दक्षिणाहीनमात्रेण कर्तृनाशायकल्पयेत् ।

आचार्योमन्त्रहीनं स्यात् क्रियाहीनं तु शिल्पिनम् ॥५४२॥

दातारं द्रव्यहीनं स्यात् त्रिवर्गं कुलनाशनम् ।

एवं तु विधिवत् कुर्याद्यथावित्तानुसारतः ॥५४३॥

वित्तशाठ्येन यः कुर्यात् कर्ता भक्तश्चनश्यति ।

तस्मात् शास्त्रोक्तमार्गेण यथावित्तानुसारतः ॥५४४॥

आहूय देशिको विप्रौ कलाशोधनशोधितम् ।

भस्मरुद्राक्ष संयुक्तं शिरोवस्त्रसमन्वितौ ॥५४५॥

प्रधानकुम्भमुद्धृत्य वर्धनीं च शिरोपरि ।

अष्टकुम्भान् समुद्धृत्य परिचार शिरस्यथ ॥५४६॥

आचार्योंहस्तकूर्चेन स्पृश्य मूलं जपेद्गुरुः ।

वाद्यघोषसमायुक्तं छत्रचामरसम्युतम् ॥ ५४७॥

वेदध्वनिसमोपेतं श्रोत्रमङ्गलवाचकैः।

हर्म्यप्रदक्षिणं कृत्वा सर्वभक्तजनैः सह ॥५४८॥

धूपदीपं पुरा कृत्वा पुष्पलाजान् प्रसारयेत् ।

पादात्पादान्तरं गत्वा द्वारदेशे प्रवेशयेत् ॥५४९॥

अर्घ्यं दत्वाथ ताम्बूलं नीराजनं ततो गुरुः ।

लिङ्गाग्रेशालिनाकल्प्य स्थण्डिलं चतुरश्रकम् ॥५५०॥

क्रमात् कुम्भांश्च संस्थाप्य प्रसन्नात्मा गुरुस्तथा ।

सकलीकरणं कृत्वा पुण्याहप्रोक्षणं कुरु ॥५५१॥

आसनं मूर्तिं विन्यस्य त्वष्टत्रिंशत्कलान्वितम् ।

ध्यात्वा सदाशिवं लिङ्गं पुष्पमादाय देशिकः ॥५५२॥

कुम्भात्बीजं समादाय लिङ्गमूर्ध्नि च विन्यसेत् ।

वर्धनीबीजमादाय पीठिकायां नियोजयेत् ॥५५३॥

अष्टविद्येश्वरान् कुम्भान् तत्तत्स्थाने नियोजयेत् ।

शिवकुम्भं समुद्धृत्य शिवलिङ्गेऽभिषेचयेत् ॥५५४॥

तत्तत्स्थानेऽभिषिच्याथ मन्त्रान्नं च निवेदयेत् ।

पञ्चामृतादि स्नपनैः अभिषेकं यथाक्रमम् ॥५५५॥

वस्त्राभरणसंयुक्तं सर्वाङ्गं गन्धलेपनम् ।

सर्वपुष्पैरलङ्कृत्य महाहविर्निवेदयेत् ॥५५६॥

धूपदीपसमायुक्तं शिवं प्रार्थ्य गुरूत्तमः ।

ब्रह्मघोषसमायुक्तं आशीर्वादं तु कारयेत् ॥५५७॥

महाभिषेकं कर्तव्यं महानैवेद्यमेव च ।

सोमास्कन्दादिमूर्तीनां उत्सवं कारयेत् ततः ॥५५८॥

अपरेदिवसेधीमान् नित्यस्नानादिकं कुरु ।

स्नपनं तत्र कुर्वीत त्वष्टोत्तरसहस्रधृक् ॥५५९॥

अष्टोत्तर शतं वापि शान्तिहोमं समाचरेत् ।

त्रिपक्षं वा द्विपक्षं वा पक्षमेकं यजेत्क्रमात् ॥५६०॥

शान्तिहोमं हुनेन्नित्यं रुद्रैकादशपारणम् ।

अस्त्रैः ब्रह्मषडङ्गैश्च जपं कुर्याद्विशेषतः ॥५६१॥

ब्राह्मणान्भोजयेन्नित्यं यथाविभवविस्तरम् ।

दिनेदिने सहस्रं वा पञ्चशतमथापि वा ॥५६२॥

सम्पूज्य ब्रह्मणान् पश्चात् अन्नकामांश्च तर्पये ।

एवमेव प्रकारेण प्रसन्नार्थं शिवस्य च ॥५६३॥

दोषानां परिहारार्थम् उष्णदोषापनुत्तये ।

एवमेव प्रकर्तव्यं देशिकैश्च शुभेशुभे ॥५६४॥

आचार्यं पूजयेत्पश्चात् वस्त्रहेमाङ्गुलीयकम् ।

मोक्षार्थी लभते मोक्षं पुत्रार्थी लभते सुखम् ॥५६५॥

अर्थार्थी चार्थमाप्नोति जयार्थी जयमाप्नुयात् ।

इहलोके सुखं प्राप्य सोऽन्ते सायुज्य माप्नुयात् ॥५६६॥

इति सहस्रतन्त्रे क्रियापादे अष्टबन्धनविधिःसमाप्ता

# VEDA AGAMA RESEARCH CENTER

VEDA AGAMA SAMSKRUTHA MAHA PATASHALA

SRI SRI GURUKUL CAMPUS

ART OF LIVING INTERNATIONAL CENTRE

21ST KM, KANAKAPURA ROAD, UDAYAPURA,

BANGALORE - 560082